# vivekachUDAmaNiH

# વિવેકચૂડામણિઃ

## Document Information

Text title : vivekachUDAmaNiH

File name : viveknew.itx

Category : shankarAchArya

Location : doc_z_misc_shankara

Author : Shankaracharya

Transliterated by : NA

Proofread by : NA, Kalyana Krrit kalyanakrrit at gmail.com, PSA Easwaran

Description-comments : Vivekachudamani, Advaita Ashram, (Swami Madhavananda)

Latest update : November 21, 2020

Send corrections to : Sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

December 3, 2021

*sanskritdocuments.org*

# વિવેકચૂડામણિઃ

સર્વવેદાન્તસિદ્ધાન્તગોચરં તમગોચરમ્ ।
ગોવિન્દં પરમાનન્દં સદ્ગુરું પ્રણતોઽસ્મ્યહમ્ ॥ ૧॥

જન્તૂનાં નરજન્મ દુર્લભમતઃ પુંસ્ત્વં તતો વિપ્રતા
તસ્માદ્વૈદિકધર્મમાર્ગપરતા વિદ્વત્ત્વમસ્માત્પરમ્ ।
આત્માનાત્મવિવેચનં સ્વનુભવો બ્રહ્માત્મના સંસ્થિતિઃ
મુક્તિર્નો શતજન્મકોટિસુકૃતૈઃ પુણ્યૈર્વિના લભ્યતે ॥ ૨॥ var  શતકોટિજન્મસુ કૃતૈઃ

દુર્લભં ત્રયમેવૈતદ્દેવાનુગ્રહહેતુકમ્ ।
મનુષ્યત્વં મુમુક્ષુત્વં મહાપુરુષસંશ્રયઃ ॥ ૩॥

લબ્ધ્વા કથઞ્ચિન્નરજન્મ દુર્લભં var  કથઞ્ચિન્
  તત્રાપિ પુંસ્ત્વં શ્રુતિપારદર્શનમ્ ।
યસ્ત્વાત્મમુક્તૌ ન યતેત મૂઢધીઃ
  સ હ્યાત્મહા સ્વં વિનિહન્ત્યસદ્ગ્રહાત્ ॥ ૪॥ var  આત્મહા સ્વં

ઇતઃ કો ન્વસ્તિ મૂઢાત્મા યસ્તુ સ્વાર્થે પ્રમાદ્યતિ ।
દુર્લભં માનુષં દેહં પ્રાપ્ય તત્રાપિ પૌરુષમ્ ॥ ૫॥

વદન્તુ શાસ્ત્રાણિ યજન્તુ દેવાન્ var  પઠન્તુ
  કુર્વન્તુ કર્માણિ ભજન્તુ દેવતાઃ ।
આત્મૈક્યબોધેન વિનાપિ મુક્તિ- var  વિના વિમુક્તિઃ ન
  ર્ન સિધ્યતિ બ્રહ્મશતાન્તરેઽપિ ॥ ૬॥

અમૃતત્ત્વસ્ય નાશાસ્તિ વિત્તેનેત્યેવ હિ શ્રુતિઃ ।
બ્રવીતિ કર્મણો મુક્તેરહેતુત્વં સ્ફુટં યતઃ ॥ ૭॥

અતો વિમુક્ત્યૈ પ્રયતેત વિદ્વાન્
  સન્ન્યસ્તબાહ્યાર્થસુખસ્પૃહઃ સન્ ।
સન્તં મહાન્તં સમુપેત્ય દેશિકં

તેનોપદિષ્ટાર્થસમાહિતાત્મા ॥ ૮॥

ઉદ્ધરેદાત્મનાऽऽત્માનં મગ્નં સંસારવારિધૌ ।
યોગારૂઢત્વમાસાદ્ય સમ્યગ્દર્શનનિષ્ઠયા ॥ ૯॥

સન્ન્યસ્ય સર્વકર્માણિ ભવબન્ધવિમુક્તયે ।
યત્યતાં પણ્ડિતૈર્ધીરૈરાત્માભ્યાસ ઉપસ્થિતૈઃ ॥ ૧૦॥

ચિત્તસ્ય શુદ્ધયે કર્મ ન તુ વસ્તૂપલબ્ધયે ।
વસ્તુસિદ્ધિર્વિચારેણ ન કિઞ્ચિત્કર્મકોટિભિઃ ॥ ૧૧॥

સમ્યગ્વિચારતઃ સિદ્ધા રજ્જુતત્ત્વાવધારણા ।
ભ્રાન્તોદિતમહાસર્પભયદુઃખવિનાશિની ॥ ૧૨॥ ભ્રાન્ત્યો
અર્થસ્ય નિશ્ચયો દૃષ્ટો વિચારેણ હિતોક્તિતઃ ।
ન સ્નાનેન ન દાનેન પ્રાણાયામશતેન વા ॥ ૧૩॥

અધિકારિણમાશાસ્તે ફલસિદ્ધિર્વિશેષતઃ ।
ઉપાયા દેશકાલાદ્યાઃ સન્ત્યસ્મિન્સહકારિણઃ ॥ ૧૪॥ સન્ત્યસ્યાં
અતો વિચારઃ કર્તવ્યો જિજ્ઞાસોરાત્મવસ્તુનઃ ॥

સમાસાદ્ય દયાસિન્ધું ગુરું બ્રહ્મવિદુત્તમમ્ ॥ ૧૫॥

મેધાવી પુરુષો વિદ્વાનૂહાપોહવિચક્ષણઃ ।
અધિકાર્યાત્મવિદ્યાયામુક્તલક્ષણલક્ષિતઃ ॥ ૧૬॥

વિવેકિનો વિરક્તસ્ય શમાદિગુણશાલિનઃ ।
મુમુક્ષોરેવ હિ બ્રહ્મજિજ્ઞાસાયોગ્યતા મતા ॥ ૧૭॥

સાધનાન્યત્ર ચત્વારિ કથિતાનિ મનીષિભિઃ ।
યેષુ સત્સ્વેવ સન્નિષ્ઠા યદભાવે ન સિધ્યતિ ॥ ૧૮॥

આદૌ નિત્યાનિત્યવસ્તુવિવેકઃ પરિગણ્યતે ।
ઇહામુત્રફલભોગવિરાગસ્તદનન્તરમ્ ।
શમાદિષટ્કસમ્પત્તિર્મુમુક્ષુત્વમિતિ સ્ફુટમ્ ॥ ૧૯॥

બ્રહ્મ સત્યં જગન્મિથ્યેત્યેવંરૂપો વિનિશ્ચયઃ ।
સોऽયં નિત્યાનિત્યવસ્તુવિવેકઃ સમુદાહૃતઃ ॥ ૨૦॥

તદ્વૈરાગ્યં જિહાસા યા દર્શનશ્રવણાદિભિઃ । જુગુપ્સા યા
દેહાદિબ્રહ્મપર્યન્તે હ્યનિત્યે ભોગવસ્તુનિ ॥ ૨૧॥ ભોગ્યવસ્તુનિ

વિરજ્ય વિષયવ્રાતાદ્દોષદૃષ્ટ્યા મુહુર્મુહુઃ ।
સ્વલક્ષ્યે નિયતાવસ્થા મનસઃ શમ ઉચ્યતે ॥ ૨૨॥

વિષયેભ્યઃ પરાવર્ત્ય સ્થાપનં સ્વસ્વગોલકે ।
ઉભયેષામિન્દ્રિયાણાં સ દમઃ પરિકીર્તિતઃ ।
બાહ્યાનાલમ્બનં વૃત્તેરેષોપરતિરુત્તમા ॥ ૨૩॥

સહનં સર્વદુઃખાનામપ્રતીકારપૂર્વકમ્ ।
ચિન્તાવિલાપરહિતં સા તિતિક્ષા નિગદ્યતે ॥ ૨૪॥

શાસ્ત્રસ્ય ગુરુવાક્યસ્ય સત્યબુદ્ધ્યવધારણમ્ । સત્યબુદ્ધ્યાવધારણા
સા શ્રદ્ધા કથિતા સદ્ભિર્યયા વસ્તૂપલભ્યતે ॥ ૨૫॥

સર્વદા સ્થાપનં બુદ્ધેઃ શુદ્ધે બ્રહ્મણિ સર્વદા । સમ્યગાસ્થાપનં
તત્સમાધાનમિત્યુક્તં ન તુ ચિત્તસ્ય લાલનમ્ ॥ ૨૬॥

અહઙ્કારાદિદેહાન્તાન્ બન્ધાનજ્ઞાનકલ્પિતાન્ ।
સ્વસ્વરૂપાવબોધેન મોક્તુમિચ્છા મુમુક્ષુતા ॥ ૨૭॥

મન્દમધ્યમરૂપાપિ વૈરાગ્યેણ શમાદિના ।
પ્રસાદેન ગુરોઃ સેયં પ્રવૃદ્ધા સૂયતે ફલમ્ ॥ ૨૮॥

વૈરાગ્યં ચ મુમુક્ષુત્વં તીવ્રં યસ્ય તુ વિદ્યતે ।
તસ્મિન્નેવાર્થવન્તઃ સ્યુઃ ફલવન્તઃ શમાદયઃ ॥ ૨૯॥

એતયોર્મન્દતા યત્ર વિરક્તત્વમુમુક્ષયોઃ ।
મરૌ સલિલવત્તત્ર શમાદેર્ભાનમાત્રતા ॥ ૩૦॥

મોક્ષકારણસામગ્ર્યાં ભક્તિરેવ ગરીયસી ।
સ્વસ્વરૂપાનુસન્ધાનં ભક્તિરિત્યભિધીયતે ॥ ૩૧॥

સ્વાત્મતત્ત્વાનુસન્ધાનં ભક્તિરિત્યપરે જગુઃ ।
ઉક્તસાધનસમ્પન્નસ્તત્ત્વજિજ્ઞાસુરાત્મનઃ ।
ઉપસીદેદ્ગુરું પ્રાજ્ઞં યસ્માદ્બન્ધવિમોક્ષણમ્ ॥ ૩૨॥

શ્રોત્રિયોઽવૃજિનોઽકામહતો યો બ્રહ્મવિત્તમઃ ।
બ્રહ્મણ્યુપરતઃ શાન્તો નિરિન્ધન ઇવાનલઃ ।
અહેતુકદયાસિન્ધુર્બન્ધુરાનમતાં સતામ્ ॥ ૩૩॥

તમારાધ્ય ગુરું ભક્ત્યા પ્રહ્વપ્રશ્રયસેવનૈઃ । પ્રહ્વઃ

પ્રસન્નં તમનુપ્રાપ્ય પૃચ્છેજ્જ્ઞાતવ્યમાત્મનઃ ॥ ૩૪॥

સ્વામિન્નમસ્તે નતલોકબન્ધો
   કારુણ્યસિન્ધો પતિતં ભવાબ્ધૌ ।
મામુદ્ધરાત્મીયકટાક્ષદૃષ્ટ્યા
   ઋજ્વ્યાતિકારુણ્યસુધાભિવૃષ્ટ્યા ॥ ૩૫॥

દુર્વારસંસારદવાગ્નિતપ્તં
   દોધૂયમાનં દુરદૃષ્ટવાતૈઃ ।
ભીતં પ્રપન્નં પરિપાહિ મૃત્યોઃ
   શરણ્યમન્યદ્યદહં ન જાને ॥ ૩૬॥ અન્યં
શાન્તા મહાન્તો નિવસન્તિ સન્તો
   વસન્તવલ્લોકહિતં ચરન્તઃ ।
તીર્ણાઃ સ્વયં ભીમભવાર્ણવં જના-
   નહેતુનાન્યાનપિ તારયન્તઃ ॥ ૩૭॥

અયં સ્વભાવઃ સ્વત એવ યત્પર-
   શ્રમાપનોદપ્રવણં મહાત્મનામ્ ।
સુધાંશુરેષ સ્વયમર્કકર્કશ-
   પ્રભાભિતપ્તામવતિ ક્ષિતિં કિલ ॥ ૩૮॥

બ્રહ્માનન્દરસાનુભૂતિકલિતૈઃ પૂતૈઃ સુશીતૈર્યુતૈ- var સુશીતૈઃ સિતૈઃ
ર્યુષ્મદ્વાક્કલશોજ્ઝિતૈઃ શ્રુતિસુખૈર્વાક્યામૃતૈઃ સેચય ।
સન્તપ્તં ભવતાપદાવદહનજ્વાલાભિરેનં પ્રભો
ધન્યાસ્તે ભવદીક્ષણક્ષણગતેઃ પાત્રીકૃતાઃ સ્વીકૃતાઃ ॥ ૩૯॥

કથં તરેયં ભવસિન્ધુમેતં
   કા વા ગતિર્મે કતમોઽસ્ત્યુપાયઃ ।
જાને ન કિઞ્ચિત્કૃપયાઽવ માં પ્રભો
   સંસારદુઃખક્ષતિમાતનુષ્વ ॥ ૪૦॥

તથા વદન્તં શરણાગતં સ્વં
   સંસારદાવાનલતાપતપ્તમ્ ।
નિરીક્ષ્ય કારુણ્યરસાર્દ્રદૃષ્ટ્યા
   દદ્યાદભીતિં સહસા મહાત્મા ॥ ૪૧॥

વિદ્વાન્ સ તસ્મા ઉપસત્તિમીયુષે

મુમુક્ષવે સાધુ યથોક્તકારિણે ।
પ્રશાન્તચિત્તાય શમાન્વિતાય
તત્ત્વોપદેશં કૃપયૈવ કુર્યાત્ ॥ ૪૨॥

મા ભૈષ્ટ વિદ્વંસ્તવ નાસ્ત્યપાયઃ
સંસારસિન્ધોસ્તરણેઽસ્ત્યુપાયઃ ।
યેનૈવ યાતા યતયોઽસ્ય પારં
તમેવ માર્ગં તવ નિર્દિશામિ ॥ ૪૩॥

અસ્ત્યુપાયો મહાન્કશ્ચિત્સંસારભયનાશનઃ ।
તેન તીર્ત્વા ભવામ્ભોધિં પરમાનન્દમાપ્સ્યસિ ॥ ૪૪॥

વેદાન્તાર્થવિચારેણ જાયતે જ્ઞાનમુત્તમમ્ ।
તેનાત્યન્તિકસંસારદુઃખનાશો ભવત્યનુ ॥ ૪૫॥

શ્રદ્ધાભક્તિધ્યાનયોગાન્મુમુક્ષોઃ
મુક્તેર્હેતૂન્વક્તિ સાક્ષાચ્છ્રુતેર્ગીઃ ।
યો વા એતેષ્વેવ તિષ્ઠત્યમુષ્ય
મોક્ષોઽવિદ્યાકલ્પિતાદ્દેહબન્ધાત્ ॥ ૪૬॥

અજ્ઞાનયોગાત્પરમાત્મનસ્તવ
હ્યનાત્મબન્ધસ્તત એવ સંસૃતિઃ ।
તયોર્વિવેકોદિતબોધવહ્નિઃ
અજ્ઞાનકાર્યં પ્રદહેત્સમૂલમ્ ॥ ૪૭॥

શિષ્ય ઉવાચ ।
કૃપયા શ્રૂયતાં સ્વામિન્પ્રશ્નોઽયં ક્રિયતે મયા ।
યદુત્તરમહં શ્રુત્વા કૃતાર્થઃ સ્યાં ભવન્મુખાત્ ॥ ૪૮॥

કો નામ બન્ધઃ કથમેષ આગતઃ
કથં પ્રતિષ્ઠાસ્ય કથં વિમોક્ષઃ ।
કોઽસાવનાત્મા પરમઃ ક આત્મા
તયોર્વિવેકઃ કથમેતદુચ્યતામ્ ॥ ૪૯॥

શ્રીગુરુવાચ ।
ધન્યોઽસિ કૃતકૃત્યોઽસિ પાવિતં તે કુલં ત્વયા । પાવિતં
યદવિદ્યાબન્ધમુક્ત્યા બ્રહ્મીભવિતુમિચ્છસિ ॥ ૫૦॥

ઋણમોચનકર્તારઃ પિતુઃ સન્તિ સુતાદયઃ ।
બન્ધમોચનકર્તા તુ સ્વસ્માદન્યો ન કશ્ચન ॥ ૫૧॥

મસ્તકન્યસ્તભારાદેર્દુઃખમન્યૈર્નિવાર્યતે ।
ક્ષુધાદિકૃતદુઃખં તુ વિના સ્વેન ન કેનચિત્ ॥ ૫૨॥

પથ્યમૌષધસેવા ચ ક્રિયતે યેન રોગિણા ।
આરોગ્યસિદ્ધિર્દૃષ્ટાઽસ્ય નાન્યાનુષ્ઠિતકર્મણા ॥ ૫૩॥

વસ્તુસ્વરૂપં સ્ફુટબોધચક્ષુષા
 સ્વેનૈવ વેદ્યં ન તુ પણ્ડિતેન ।
ચન્દ્રસ્વરૂપં નિજચક્ષુષૈવ
 જ્ઞાતવ્યમન્યૈરવગમ્યતે કિમ્ ॥ ૫૪॥

અવિદ્યાકામકર્માદિપાશબન્ધં વિમોચિતુમ્ ।
કઃ શક્નુયાદ્વિનાઽઽત્માનં કલ્પકોટિશતૈરપિ ॥ ૫૫॥

ન યોગેન ન સાઙ્ખ્યેન કર્મણા નો ન વિદ્યયા ।
બ્રહ્માત્મૈકત્વબોધેન મોક્ષઃ સિધ્યતિ નાન્યથા ॥ ૫૬॥

વીણાયા રૂપસૌન્દર્યં તન્ત્રીવાદનસૌષ્ઠવમ્ ।
પ્રજારઞ્જનમાત્રં તન્ન સામ્રાજ્યાય કલ્પતે ॥ ૫૭॥

વાગ્વૈખરી શબ્દઝરી શાસ્ત્રવ્યાખ્યાનકૌશલમ્ ।
વૈદુષ્યં વિદુષાં તદ્વદ્ભુક્તયે ન તુ મુક્તયે ॥ ૫૮॥

અવિજ્ઞાતે પરે તત્ત્વે શાસ્ત્રાધીતિસ્તુ નિષ્ફલા ।
વિજ્ઞાતેઽપિ પરે તત્ત્વે શાસ્ત્રાધીતિસ્તુ નિષ્ફલા ॥ ૫૯॥

શબ્દજાલં મહારણ્યં ચિત્તભ્રમણકારણમ્ ।
અતઃ પ્રયત્નાજ્જ્ઞાતવ્યં તત્ત્વજ્ઞૈસ્તત્ત્વમાત્મનઃ ॥ ૬૦॥ તત્ત્વજ્ઞાત્તત્ત્વ
અજ્ઞાનસર્પદષ્ટસ્ય બ્રહ્મજ્ઞાનૌષધં વિના ।
કિમુ વેદૈશ્ચ શાસ્ત્રૈશ્ચ કિમુ મન્ત્રૈઃ કિમૌષધૈઃ ॥ ૬૧॥

ન ગચ્છતિ વિના પાનં વ્યાધિરૌષધશબ્દતઃ ।
વિનાઽપરોક્ષાનુભવં બ્રહ્મશબ્દૈર્ન મુચ્યતે ॥ ૬૨॥

અકૃત્વા દૃશ્યવિલયમજ્ઞાત્વા તત્ત્વમાત્મનઃ ।
બ્રહ્મશબ્દૈઃ કુતો મુક્તિરુક્તિમાત્રફલૈર્નૃણામ્ ॥ ૬૩॥ બાહ્યશબ્દૈઃ

અકૃત્વા શત્રુસંહારમગત્વાખિલભૂશ્રિયમ્ ।
રાજાહમિતિ શબ્દાન્નો રાજા ભવિતુમર્હતિ ॥ ૬૪॥

આપ્તોક્તિં ખનનં તથોપરિશિલાદ્યુત્કર્ષણં સ્વીકૃતિં var પરિશિલાપાકર્ષણં
નિક્ષેપઃ સમપેક્ષતે ન હિ બહિઃશબ્દૈસ્તુ નિર્ગચ્છતિ ।
તદ્વદ્બ્રહ્મવિદોપદેશમનનધ્યાનાદિભિર્લભ્યતે
માયાકાર્યતિરોહિતં સ્વમમલં તત્ત્વં ન દુર્યુક્તિભિઃ ॥ ૬૫॥

તસ્માત્સર્વપ્રયત્નેન ભવબન્ધવિમુક્તયે ।
સ્વૈરેવ યત્નઃ કર્તવ્યો રોગાદાવિવ પણ્ડિતૈઃ ॥ ૬૬॥ રોગાદેરિવ
યસ્ત્વયાદ્ય કૃતઃ પ્રશ્નો વરીયાઞ્છાસ્ત્રવિન્મતઃ । સમ્મતઃ
સૂત્રપ્રાયો નિગૂઢાર્થો જ્ઞાતવ્યશ્ચ મુમુક્ષુભિઃ ॥ ૬૭॥

શૃણુષ્વાવહિતો વિદ્વન્યન્મયા સમુદીર્યતે ।
તદેતચ્છ્રવણાત્સદ્યો ભવબન્ધાદ્વિમોક્ષ્યસે ॥ ૬૮॥

મોક્ષસ્ય હેતુઃ પ્રથમો નિગદ્યતે
   વૈરાગ્યમત્યન્તમનિત્યવસ્તુષુ ।
તતઃ શમશ્ચાપિ દમસ્તિતિક્ષા
   ન્યાસઃ પ્રસક્તાખિલકર્મણાં ભૃશમ્ ॥ ૬૯॥

તતઃ શ્રુતિસ્તન્મનનં સતત્ત્વ-
   ધ્યાનં ચિરં નિત્યનિરન્તરં મુનેઃ ।
તતોઽવિકલ્પં પરમેત્ય વિદ્વાન્
   ઇહૈવ નિર્વાણસુખં સમૃચ્છતિ ॥ ૭૦॥

યદ્બોદ્ધવ્યં તવેદાનીમાત્માનાત્મવિવેચનમ્ ।
તદુચ્યતે મયા સમ્યક્ શ્રુત્વાત્મન્યવધારય ॥ ૭૧॥

મજ્જાસ્થિમેદઃપલરક્તચર્મ-
   ત્વગાહ્વયૈર્ધાતુભિરેભિરન્વિતમ્ ।
પાદોરુવક્ષોભુજપૃષ્ઠમસ્તકૈઃ
   અઙ્ગૈરુપાઙ્ગૈરુપયુક્તમેતત્ ॥ ૭૨॥

અહમ્મમેતિ પ્રથિતં શરીરં
   મોહાસ્પદં સ્થૂલમિતીર્યતે બુધૈઃ ।
નભોનભસ્વદ્દહનામ્બુભૂમયઃ

સૂક્ષ્માણિ ભૂતાનિ ભવન્તિ તાનિ ॥ ૭૩॥

પરસ્પરાંશૈર્મિલિતાનિ ભૂત્વા
સ્થૂલાનિ ચ સ્થૂલશરીરહેતવઃ ।
માત્રાસ્તદીયા વિષયા ભવન્તિ
શબ્દાદયઃ પઞ્ચ સુખાય ભોક્તુઃ ॥ ૭૪॥

ય એષુ મૂઢા વિષયેષુ બદ્ધા
રાગોરુપાશેન સુદુર્દમેન ।
આયાન્તિ નિર્યાન્ત્યધ ઊર્ધ્વમુચ્ચૈઃ
સ્વકર્મદૂતેન જવેન નીતાઃ ॥ ૭૫॥

શબ્દાદિભિઃ પઞ્ચભિરેવ પઞ્ચ
પઞ્ચત્વમાપુઃ સ્વગુણેન બદ્ધાઃ ।
કુરઙ્ગમાતઙ્ગપતઙ્ગમીન-
ભૃઙ્ગા નરઃ પઞ્ચભિરઞ્ચિતઃ કિમ્ ॥ ૭૬॥

દોષેણ તીવ્રો વિષયઃ કૃષ્ણસર્પવિષાદપિ ।
વિષં નિહન્તિ ભોક્તારં દ્રષ્ટારં ચક્ષુષાપ્યયમ્ ॥ ૭૭॥

વિષયાશામહાપાશાદ્યો વિમુક્તઃ સુદુસ્ત્યજાત્ ।
સ એવ કલ્પતે મુક્ત્યૈ નાન્યઃ ષટ્શાસ્ત્રવેદ્યપિ ॥ ૭૮॥

આપાતવૈરાગ્યવતો મુમુક્ષૂન્
ભવાબ્ધિપારં પ્રતિયાતુમુદ્યતાન્ ।
આશાગ્રહો મજ્જયતેઽન્તરાલે
નિગૃહ્ય કણ્ઠે વિનિવર્ત્ય વેગાત્ ॥ ૭૯॥

વિષયાખ્યગ્રહો યેન સુવિરક્ત્યસિના હતઃ ।
સ ગચ્છતિ ભવામ્ભોધેઃ પારં પ્રત્યૂહવર્જિતઃ ॥ ૮૦॥

વિષમવિષયમાર્ગૈર્ગચ્છતોઽનચ્છબુદ્ધેઃ var વિષયમાર્ગે ગચ્છતો
પ્રતિપદમભિયાતો મૃત્યુરપ્યેષ વિદ્ધિ । var પ્રતિપદમભિઘાતો મૃત્યુરપ્યેષ સિદ્ધઃ
હિતસુજનગુરૂક્ત્યા ગચ્છતઃ સ્વસ્ય યુક્ત્યા
પ્રભવતિ ફલસિદ્ધિઃ સત્યમિત્યેવ વિદ્ધિ ॥ ૮૧॥

મોક્ષસ્ય કાઙ્ક્ષા યદિ વૈ તવાસ્તિ
ત્યજાતિદૂરાદ્વિષયાન્વિષં યથા ।

પીયૂષવત્તોષદયાક્ષમાર્જવ-
   પ્રશાન્તિદાન્તીર્ભજ નિત્યમાદરાત્ ॥ ૮૨॥

અનુક્ષણં યત્પરિહૃત્ય કૃત્યં
   અનાદ્યવિદ્યાકૃતબન્ધમોક્ષણમ્ ।
દેહઃ પરાર્થોઽયમમુષ્ય પોષણે
   યઃ સજ્જતે સ સ્વમનેન હન્તિ ॥ ૮૩॥

શરીરપોષણાર્થી સન્ ય આત્માનં દિદૃક્ષતિ । દિદૃક્ષતે
ગ્રાહં દારુધિયા ધૃત્વા નદીં તર્તું સ ગચ્છતિ ॥ ૮૪॥ સ ઇચ્છતિ
મોહ એવ મહામૃત્યુર્મુમુક્ષોર્વપુરાદિષુ ।
મોહો વિનિર્જિતો યેન સ મુક્તિપદમર્હતિ ॥ ૮૫॥

મોહં જહિ મહામૃત્યું દેહદારસુતાદિષુ ।
યં જિત્વા મુનયો યાન્તિ તદ્વિષ્ણોઃ પરમં પદમ્ ॥ ૮૬॥

ત્વઙ્માંસરુધિરસ્નાયુમેદોમજ્જાસ્થિસઙ્કુલમ્ ।
પૂર્ણં મૂત્રપુરીષાભ્યાં સ્થૂલં નિન્દ્યમિદં વપુઃ ॥ ૮૭॥

પઞ્ચીકૃતેભ્યો ભૂતેભ્યઃ સ્થૂલેભ્યઃ પૂર્વકર્મણા ।
સમુત્પન્નમિદં સ્થૂલં ભોગાયતનમાત્મનઃ ।
અવસ્થા જાગરસ્તસ્ય સ્થૂલાર્થાનુભવો યતઃ ॥ ૮૮॥

બાહ્યેન્દ્રિયૈઃ સ્થૂલપદાર્થસેવાં
   સ્રક્ચન્દનસ્ત્ર્યાદિવિચિત્રરૂપામ્ ।
કરોતિ જીવઃ સ્વયમેતદાત્મના
   તસ્માત્પ્રશસ્તિર્વપુષોઽસ્ય જાગરે ॥ ૮૯॥

સર્વોઽપિ બાહ્યસંસારઃ પુરુષસ્ય યદાશ્રયઃ ।
વિદ્ધિ દેહમિદં સ્થૂલં ગૃહવદ્ગૃહમેધિનઃ ॥ ૯૦॥

સ્થૂલસ્ય સમ્ભવજરામરણાનિ ધર્માઃ
   સ્થૌલ્યાદયો બહુવિધાઃ શિશુતાદ્યવસ્થાઃ ।
વર્ણાશ્રમાદિનિયમા બહુધાઽઽમયાઃ સ્યુઃ
   પૂજાવમાનબહુમાનમુખા વિશેષાઃ ॥ ૯૧॥

બુદ્ધીન્દ્રિયાણિ શ્રવણં ત્વગક્ષિ
   ઘ્રાણં ચ જિહ્વા વિષયાવબોધનાત્ ।

વાક્પાણિપાદા ગુદમપ્યુપસ્થઃ var ઉપસ્થં
   કર્મેન્દ્રિયાણિ પ્રવણેન કર્મસુ ॥ ૯૨॥ પ્રવણાનિ
નિગદ્યતેઽન્તઃકરણં મનોધીઃ
   અહઙ્કૃતિશ્ચિત્તમિતિ સ્વવૃત્તિભિઃ ।
મનસ્તુ સઙ્કલ્પવિકલ્પનાદિભિઃ
   બુદ્ધિઃ પદાર્થાધ્યવસાયધર્મતઃ ॥ ૯૩॥

અત્રાભિમાનાદહમિત્યહઙ્કૃતિઃ ।
   સ્વાર્થાનુસન્ધાનગુણેન ચિત્તમ્ ॥ ૯૪॥

પ્રાણાપાનવ્યાનોદાનસમાના ભવત્યસૌ પ્રાણઃ ।
સ્વયમેવ વૃત્તિભેદાદ્વિકૃતિભેદાત્સુવર્ણસલિલાદિવત્ ॥ ૯૫॥ વિકૃતેર્ભેદાત્સુવર્ણસલિલમિવ
વાગાદિ પઞ્ચ શ્રવણાદિ પઞ્ચ
   પ્રાણાદિ પઞ્ચાભ્રમુખાનિ પઞ્ચ ।
બુદ્ધ્યાદ્યવિદ્યાપિ ચ કામકર્મણી
   પુર્યષ્ટકં સૂક્ષ્મશરીરમાહુઃ ॥ ૯૬॥

ઇદં શરીરં શૃણુ સૂક્ષ્મસંજ્ઞિતં
   લિઙ્ગં ત્વપઞ્ચીકૃતભૂતસમ્ભવમ્ ।
સવાસનં કર્મફલાનુભાવકં
   સ્વાજ્ઞાનતોઽનાદિરુપાધિરાત્મનઃ ॥ ૯૭॥

સ્વપ્નો ભવત્યસ્ય વિભક્ત્યવસ્થા
   સ્વમાત્રશેષેણ વિભાતિ યત્ર ।
સ્વપ્ને તુ બુદ્ધિઃ સ્વયમેવ જાગ્રત્
   કાલીનનાનાવિધવાસનાભિઃ ॥ ૯૮॥

કર્ત્રાદિભાવં પ્રતિપદ્ય રાજતે
   યત્ર સ્વયં ભાતિ હ્યયં પરાત્મા । સ્વયઞ્જ્યોતિરયં
ધીમાત્રકોપાધિરશેષસાક્ષી
   ન લિપ્યતે તત્કૃતકર્મલેશૈઃ । કર્મલેપૈઃ
યસ્માદસઙ્ગસ્તત એવ કર્મભિઃ
   ન લિપ્યતે કિઞ્ચિદુપાધિના કૃતૈઃ ॥ ૯૯॥

સર્વવ્યાપૃતિકરણં લિઙ્ગમિદં સ્યાચ્ચિદાત્મનઃ પુંસઃ ।
વાસ્યાદિકમિવ તક્ષણસ્તેનૈવાત્મા ભવત્યસઙ્ગોઽયમ્ ॥ ૧૦૦॥

અન્ધત્વમન્દત્વપટુત્વધર્માઃ
 સૌગુણ્યવૈગુણ્યવશાદ્ધિ ચક્ષુષઃ ।
બાધિર્યમૂકત્વમુખાસ્તથૈવ
 શ્રોત્રાદિધર્મા ન તુ વેત્તુરાત્મનઃ ॥ ૧૦૧॥

ઉચ્છ્વાસનિઃશ્વાસવિજૃમ્ભણક્ષુ-
 ત્પ્રસ્યન્દનાદ્યુત્ક્રમણાદિકાઃ ક્રિયાઃ । પ્રસ્પન્દનાદ્
પ્રાણાદિકર્માણિ વદન્તિ તજ્ઞાઃ var તજ્જ્ઞાઃ
 પ્રાણસ્ય ધર્માવશનાપિપાસે ॥ ૧૦૨॥

અન્તઃકરણમેતેષુ ચક્ષુરાદિષુ વર્ષ્મણિ ।
અહમિત્યભિમાનેન તિષ્ઠત્યાભાસતેજસા ॥ ૧૦૩॥

અહઙ્કારઃ સ વિજ્ઞેયઃ કર્તા ભોક્તાભિમાન્યયમ્ ।
સત્ત્વાદિગુણયોગેન ચાવસ્થાત્રયમશ્નુતે ॥ ૧૦૪॥ યોગેનાવસ્થાત્રિતયમશ્નુતે
વિષયાણામાનુકૂલ્યે સુખી દુઃખી વિપર્યયે ।
સુખં દુઃખં ચ તદ્ધર્મઃ સદાનન્દસ્ય નાત્મનઃ ॥ ૧૦૫॥

આત્માર્થત્વેન હિ પ્રેયાન્વિષયો ન સ્વતઃ પ્રિયઃ ।
સ્વત એવ હિ સર્વેષામાત્મા પ્રિયતમો યતઃ ।
તત આત્મા સદાનન્દો નાસ્ય દુઃખં કદાચન ॥ ૧૦૬॥

યત્સુષુપ્તૌ નિર્વિષય આત્માનન્દોઽનુભૂયતે ।
શ્રુતિઃ પ્રત્યક્ષમૈતિહ્યમનુમાનં ચ જાગ્રતિ ॥ ૧૦૭॥

અવ્યક્તનામ્ની પરમેશશક્તિઃ
 અનાદ્યવિદ્યા ત્રિગુણાત્મિકા પરા ।
કાર્યાનુમેયા સુધિયૈવ માયા
 યયા જગત્સર્વમિદં પ્રસૂયતે ॥ ૧૦૮॥

સન્નાપ્યસન્નાપ્યુભયાત્મિકા નો
 ભિન્નાપ્યભિન્નાપ્યુભયાત્મિકા નો ।
સાઙ્ગાપ્યનઙ્ગા હ્યુભયાત્મિકા નો var અનઙ્ગાપ્યુભયાત્મિકા
 મહાદ્ભુતાઽનિર્વચનીયરૂપા ॥ ૧૦૯॥

શુદ્ધાદ્વયબ્રહ્મવિબોધનાશ્યા
 સર્પભ્રમો રજ્જુવિવેકતો યથા ।

રજસ્તમઃસત્ત્વમિતિ પ્રસિદ્ધા
ગુણાસ્તદીયાઃ પ્રથિતૈઃ સ્વકાર્યૈઃ ॥ ૧૧૦॥

વિક્ષેપશક્તી રજસઃ ક્રિયાત્મિકા
યતઃ પ્રવૃત્તિઃ પ્રસૃતા પુરાણી ।
રાગાદયોઽસ્યાઃ પ્રભવન્તિ નિત્યં
દુઃખાદયો યે મનસો વિકારાઃ ॥ ૧૧૧॥

કામઃ ક્રોધો લોભદમ્ભાદ્યસૂયા var લોભદમ્ભાભ્યસૂયા
અહઙ્કારેર્ષ્યામત્સરાદ્યાસ્તુ ઘોરાઃ ।
ધર્મા એતે રાજસાઃ પુમ્પ્રવૃત્તિ-
ર્યસ્માદેષા તદ્રજો બન્ધહેતુઃ ॥ ૧૧૨॥ યસ્માદેતત્તદ્રજો
એષાઽઽવૃતિર્નામ તમોગુણસ્ય
શક્તિર્મયા વસ્ત્વવભાસતેઽન્યથા । શક્તિર્યયા
સૈષા નિદાનં પુરુષસ્ય સંસૃતેઃ
વિક્ષેપશક્તેઃ પ્રવણસ્ય હેતુઃ ॥ ૧૧૩॥ પ્રસરસ્ય
પ્રજ્ઞાવાનપિ પણ્ડિતોઽપિ ચતુરોઽપ્યત્યન્તસૂક્ષ્માત્મદૃગ્- var સૂક્ષ્માર્થદૃગ્
વ્યાલીઢસ્તમસા ન વેત્તિ બહુધા સમ્બોધિતોઽપિ સ્ફુટમ્ ।
ભ્રાન્ત્યારોપિતમેવ સાધુ કલયત્યાલમ્બતે તદ્ગુણાન્
હન્તાસૌ પ્રબલા દુરન્તતમસઃ શક્તિર્મહત્યાવૃતિઃ ॥ ૧૧૪॥

અભાવના વા વિપરીતભાવનાઽ- var વિપરીતભાવના
સમ્ભાવના વિપ્રતિપત્તિરસ્યાઃ ।
સંસર્ગયુક્તં ન વિમુઞ્ચતિ ધ્રુવં
વિક્ષેપશક્તિઃ ક્ષપયત્યજસ્રમ્ ॥ ૧૧૫॥

અજ્ઞાનમાલસ્યજડત્વનિદ્રા-
પ્રમાદમૂઢત્વમુખાસ્તમોગુણાઃ ।
એતૈઃ પ્રયુક્તો ન હિ વેત્તિ કિઞ્ચિત્
નિદ્રાલુવત્સ્તમ્ભવદેવ તિષ્ઠતિ ॥ ૧૧૬॥

સત્ત્વં વિશુદ્ધં જલવત્તથાપિ
તાભ્યાં મિલિત્વા સરણાય કલ્પતે ।
યત્રાત્મબિમ્બઃ પ્રતિબિમ્બિતઃ સન્
પ્રકાશયત્યર્ક ઇવાખિલં જડમ્ ॥ ૧૧૭॥

મિશ્રસ્ય સત્ત્વસ્ય ભવન્તિ ધર્માઃ
   ત્વમાનિતાદ્યા નિયમા યમાદ્યાઃ ।
શ્રદ્ધા ચ ભક્તિશ્ચ મુમુક્ષુતા ચ
   દૈવી ચ સમ્પત્તિરસન્નિવૃત્તિઃ ॥ ૧૧૮॥

વિશુદ્ધસત્ત્વસ્ય ગુણાઃ પ્રસાદઃ
   સ્વાત્માનુભૂતિઃ પરમા પ્રશાન્તિઃ ।
તૃપ્તિઃ પ્રહર્ષઃ પરમાત્મનિષ્ઠા
   યયા સદાનન્દરસં સમૃચ્છતિ ॥ ૧૧૯॥

અવ્યક્તમેતત્ત્રિગુણૈર્નિરુક્તં
   તત્કારણં નામ શરીરમાત્મનઃ ।
સુષુપ્તિરેતસ્ય વિભક્ત્યવસ્થા
   પ્રલીનસર્વેન્દ્રિયબુદ્ધિવૃત્તિઃ ॥ ૧૨૦॥

સર્વપ્રકારપ્રમિતિપ્રશાન્તિઃ
   બીજાત્મનાવસ્થિતિરેવ બુદ્ધેઃ ।
સુષુપ્તિરેતસ્ય કિલ પ્રતીતિઃ var સુષુપ્તિરત્રાસ્ય
   કિઞ્ચિન્ન વેદ્મીતિ જગત્પ્રસિદ્ધેઃ ॥ ૧૨૧॥

દેહેન્દ્રિયપ્રાણમનોઽહમાદયઃ
   સર્વે વિકારા વિષયાઃ સુખાદયઃ ।
વ્યોમાદિભૂતાન્યખિલં ચ વિશ્વં
   અવ્યક્તપર્યન્તમિદં હ્યનાત્મા ॥ ૧૨૨॥

માયા માયાકાર્યં સર્વં મહદાદિદેહપર્યન્તમ્ ।
અસદિદમનાત્મતત્ત્વં વિદ્ધિ ત્વં મરુમરીચિકાકલ્પમ્ ॥ ૧૨૩॥

અથ તે સમ્પ્રવક્ષ્યામિ સ્વરૂપં પરમાત્મનઃ ।
યદ્વિજ્ઞાય નરો બન્ધાન્મુક્તઃ કૈવલ્યમશ્નુતે ॥ ૧૨૪॥

અસ્તિ કશ્ચિત્સ્વયં નિત્યમહમ્પ્રત્યયલમ્બનઃ ।
અવસ્થાત્રયસાક્ષી સન્પઞ્ચકોશવિલક્ષણઃ ॥ ૧૨૫॥

યો વિજાનાતિ સકલં જાગ્રત્સ્વપ્નસુષુપ્તિષુ ।
બુદ્ધિતદ્વૃત્તિસદ્ભાવમભાવમહમિત્યયમ્ ॥ ૧૨૬॥

યઃ પશ્યતિ સ્વયં સર્વં યં ન પશ્યતિ કશ્ચન । કિઞ્ચન

યશ્ચેતયતિ બુદ્ધ્યાદિ ન તદ્યં ચેતયત્યયમ્ ॥ ૧૨૭॥

યેન વિશ્વમિદં વ્યાપ્તં યં ન વ્યાપ્નોતિ કિઞ્ચન ।
આભારૂપમિદં સર્વં યં ભાન્તમનુભાત્યયમ્ ॥ ૧૨૮॥

યસ્ય સન્નિધિમાત્રેણ દેહેન્દ્રિયમનોધિયઃ ।
વિષયેષુ સ્વકીયેષુ વર્તન્તે પ્રેરિતા ઇવ ॥ ૧૨૯॥

અહઙ્કારાદિદેહાન્તા વિષયાશ્ચ સુખાદયઃ ।
વેદ્યન્તે ઘટવદ્યેન નિત્યબોધસ્વરૂપિણા ॥ ૧૩૦॥

એષોઽન્તરાત્મા પુરુષઃ પુરાણો
   નિરન્તરાખણ્ડસુખાનુભૂતિઃ ।
સદૈકરૂપઃ પ્રતિબોધમાત્રો
   યેનેષિતા વાગસવશ્ચરન્તિ ॥ ૧૩૧॥

અત્રૈવ સત્ત્વાત્મનિ ધીગુહાયાં
   અવ્યાકૃતાકાશ ઉશત્પ્રકાશઃ । ઉરુપ્રકાશઃ
આકાશ ઉચ્ચૈ રવિવત્પ્રકાશતે
   સ્વતેજસા વિશ્વમિદં પ્રકાશયન્ ॥ ૧૩૨॥

જ્ઞાતા મનોઽહઙ્કૃતિવિક્રિયાણાં
   દેહેન્દ્રિયપ્રાણકૃતક્રિયાણામ્ ।
અયોઽગ્નિવત્તાનનુવર્તમાનો
   ન ચેષ્ટતે નો વિકરોતિ કિઞ્ચન ॥ ૧૩૩॥

ન જાયતે નો મ્રિયતે ન વર્ધતે
   ન ક્ષીયતે નો વિકરોતિ નિત્યઃ ।
વિલીયમાનેઽપિ વપુષ્યમુષ્મિ-
   ન્ન લીયતે કુમ્ભ ઇવામ્બરં સ્વયમ્ ॥ ૧૩૪॥

પ્રકૃતિવિકૃતિભિન્નઃ શુદ્ધબોધસ્વભાવઃ
   સદસદિદમશેષં ભાસયન્નિર્વિશેષઃ ।
વિલસતિ પરમાત્મા જાગ્રદાદિષ્વવસ્થા-
   સ્વહમહમિતિ સાક્ષાત્સાક્ષિરૂપેણ બુદ્ધેઃ ॥ ૧૩૫॥

નિયમિતમનસામું ત્વં સ્વમાત્માનમાત્મ-
   ન્યયમહમિતિ સાક્ષાદ્વિદ્ધિ બુદ્ધિપ્રસાદાત્ ।

જનિમરણતરઙ્ગાપારસંસારસિન્ધું
   પ્રતર ભવ કૃતાર્થો બ્રહ્મરૂપેણ સંસ્થઃ ॥ ૧૩૬॥

અત્રાનાત્મન્યહમિતિ મતિર્બન્ધ એષોઽસ્ય પુંસઃ
   પ્રાપ્તોઽજ્ઞાનાજ્જનનમરણક્લેશસમ્પાતહેતુઃ ।
યેનૈવાયં વપુરિદમસત્સત્યમિત્યાત્મબુદ્ધ્યા
   પુષ્યત્યુક્ષત્યવતિ વિષયૈસ્તન્તુભિઃ કોશકૃદ્વત્ ॥ ૧૩૭॥

અતસ્મિંસ્તદ્બુદ્ધિઃ પ્રભવતિ વિમૂઢસ્ય તમસા
વિવેકાભાવાદ્વૈ સ્ફુરતિ ભુજગે રજ્જુધિષણા ।
તતોઽનર્થવ્રાતો નિપતતિ સમાદાતુરધિકઃ
તતો યોઽસદ્ગ્રાહઃ સ હિ ભવતિ બન્ધઃ શ ૃણુ સખે ॥ ૧૩૮॥

અખણ્ડનિત્યાદ્વયબોધશક્ત્યા
   સ્ફુરન્તમાત્માનમનન્તવૈભવમ્ ।
સમાવૃણોત્યાવૃતિશક્તિરેષા
   તમોમયી રાહુરિવાર્કબિમ્બમ્ ॥ ૧૩૯॥

તિરોભૂતે સ્વાત્મન્યમલતરતેજોવતિ પુમાન્
   અનાત્માનં મોહાદહમિતિ શરીરં કલયતિ ।
તતઃ કામક્રોધપ્રભૃતિભિરમું બન્ધનગુણૈઃ var બન્ધકગુણૈઃ
   પરં વિક્ષેપાખ્યા રજસ ઉરુશક્તિર્વ્યથયતિ ॥ ૧૪૦॥

મહામોહગ્રાહગ્રસનગલિતાત્માવગમનો
   ધિયો નાનાવસ્થાં સ્વયમભિનયંસ્તદ્ગુણતયા । નાનાવસ્થાઃ
અપારે સંસારે વિષયવિષપૂરે જલનિધૌ
   નિમજ્યોન્મજ્યાયં ભ્રમતિ કુમતિઃ કુત્સિતગતિઃ ॥ ૧૪૧॥

ભાનુપ્રભાસઞ્જનિતાભ્રપઙ્ક્તિઃ
   ભાનું તિરોધાય વિજૃમ્ભતે યથા ।
આત્મોદિતાહઙ્કૃતિરાત્મતત્ત્વં
   તથા તિરોધાય વિજૃમ્ભતે સ્વયમ્ ॥ ૧૪૨॥

કવલિતદિનનાથે દુર્દિને સાન્દ્રમેઘૈઃ
   વ્યથયતિ હિમઝઞ્ઝાવાયુરુગ્રો યથૈતાન્ ।
અવિરતતમસાઽઽત્મન્યાવૃતે મૂઢબુદ્ધિં
   ક્ષપયતિ બહુદુઃખૈસ્તીવ્રવિક્ષેપશક્તિઃ ॥ ૧૪૩॥

એતાભ્યામેવ શક્તિભ્યાં બન્ધઃ પુંસઃ સમાગતઃ ।
યાભ્યાં વિમોહિતો દેહં મત્વાઽઽત્માનં ભ્રમત્યયમ્ ॥ ૧૪૪॥

બીજં  સંસૃતિભૂમિજસ્ય તુ તમો દેહાત્મધીરઙ્કુરો
રાગઃ પલ્લવમમ્બુ કર્મ તુ વપુઃ સ્કન્ધોઽસવઃ શાખિકાઃ ।
અગ્રાણીન્દ્રિયસંહતિશ્ચ વિષયાઃ પુષ્પાણિ દુઃખં ફલં
નાનાકર્મસમુદ્ભવં બહુવિધં ભોક્તાત્ર જીવઃ ખગઃ ॥ ૧૪૫॥

અજ્ઞાનમૂલોઽયમનાત્મબન્ધો
   નૈસર્ગિકોઽનાદિરનન્ત ઈરિતઃ ।
જન્માપ્યયવ્યાધિજરાદિદુઃખ-
   પ્રવાહપાતં જનયત્યમુષ્ય ॥ ૧૪૬॥

નાસ્ત્રૈર્ન શસ્ત્રૈરનિલેન વહ્નિના
   છેત્તું ન શક્યો ન ચ કર્મકોટિભિઃ ।
વિવેકવિજ્ઞાનમહાસિના વિના
   ધાતુઃ પ્રસાદેન શિતેન મઞ્જુના ॥ ૧૪૭॥

શ્રુતિપ્રમાણૈકમતેઃ સ્વધર્મ
   નિષ્ઠા તયૈવાત્મવિશુદ્ધિરસ્ય ।
વિશુદ્ધબુદ્ધેઃ પરમાત્મવેદનં
   તેનૈવ સંસારસમૂલનાશઃ ॥ ૧૪૮॥

કોશૈરન્નમયાદ્યૈઃ પઞ્ચભિરાત્મા ન સંવૃતો ભાતિ ।
નિજશક્તિસમુત્પન્નૈઃ શૈવાલપટલૈરિવામ્બુ વાપીસ્થમ્ ॥ ૧૪૯॥

તચ્છૈવાલાપનયે સમ્યક્ સલિલં પ્રતીયતે શુદ્ધમ્ ।
તૃષ્ણાસન્તાપહરં સદ્યઃ સૌખ્યપ્રદં પરં પુંસઃ ॥ ૧૫૦॥

પઞ્ચાનામપિ કોશાનામપવાદે વિભાત્યયં શુદ્ધઃ ।
નિત્યાનન્દૈકરસઃ પ્રત્યગ્રૂપઃ પરઃ સ્વયઞ્જ્યોતિઃ ॥ ૧૫૧॥

આત્માનાત્મવિવેકઃ કર્તવ્યો બન્ધમુક્તયે વિદુષા ।
તેનૈવાનન્દી ભવતિ સ્વં વિજ્ઞાય સચ્ચિદાનન્દમ્ ॥ ૧૫૨॥

મુઞ્જાદિષીકામિવ દૃશ્યવર્ગાત્
   પ્રત્યઞ્ચમાત્માનમસઙ્ગમક્રિયમ્ ।

વિવિચ્ય તત્ર પ્રવિલાપ્ય સર્વં
તદાત્મના તિષ્ઠતિ યઃ સ મુક્તઃ ॥ ૧૫૩॥

દેહોઽયમન્નભવનોઽન્નમયસ્તુ કોશ- var કોશો
શ્ચાન્નેન જીવતિ વિનશ્યતિ તદ્વિહીનઃ । હ્યન્નેન
ત્વક્ચર્મમાંસરુધિરાસ્થિપુરીષરાશિ-
ર્નાયં સ્વયં ભવિતુમર્હતિ નિત્યશુદ્ધઃ ॥ ૧૫૪॥

પૂર્વં જનેરધિમૃતેરપિ નાયમસ્તિ var જનેરપિમૃતેરથ
જાતક્ષણઃ ક્ષણગુણોઽનિયતસ્વભાવઃ ।
નૈકો જડશ્ચ ઘટવત્પરિદૃશ્યમાનઃ
સ્વાત્મા કથં ભવતિ ભાવવિકારવેત્તા ॥ ૧૫૫॥

પાણિપાદાદિમાન્દેહો નાત્મા વ્યઙ્ગેઽપિ જીવનાત્ ।
તત્તચ્છક્તેરનાશાચ્ચ ન નિયમ્યો નિયામકઃ ॥ ૧૫૬॥

દેહતદ્ધર્મતત્કર્મતદવસ્થાદિસાક્ષિણઃ ।
સત એવ સ્વતઃસિદ્ધં તદ્વૈલક્ષણ્યમાત્મનઃ ॥ ૧૫૭॥

શલ્યરાશિર્માંસલિપ્તો મલપૂર્ણોઽતિકશ્મલઃ ।
કથં ભવેદયં વેત્તા સ્વયમેતદ્વિલક્ષણઃ ॥ ૧૫૮॥

ત્વઙ્માંસમેદોઽસ્થિપુરીષરાશા-
વહમ્મતિં મૂઢજનઃ કરોતિ ।
વિલક્ષણં વેત્તિ વિચારશીલો
નિજસ્વરૂપં પરમાર્થભૂતમ્ ॥ ૧૫૯॥

દેહોઽહમિત્યેવ જડસ્ય બુદ્ધિઃ
દેહે ચ જીવે વિદુષસ્ત્વહન્ધીઃ ।
વિવેકવિજ્ઞાનવતો મહાત્મનો
બ્રહ્માહમિત્યેવ મતિઃ સદાત્મનિ ॥ ૧૬૦॥

અત્રાત્મબુદ્ધિં ત્યજ મૂઢબુદ્ધે
ત્વઙ્માંસમેદોઽસ્થિપુરીષરાશૌ ।
સર્વાત્મનિ બ્રહ્મણિ નિર્વિકલ્પે
કુરુષ્વ શાન્તિં પરમાં ભજસ્વ ॥ ૧૬૧॥

દેહેન્દ્રિયાદાવસતિ ભ્રમોદિતાં

વિદ્વાનહન્તાં ન જહાતિ યાવત્ ।
તાવન્ન તસ્યાસ્તિ વિમુક્તિવાર્તા-
પ્યસ્ત્વેષ વેદાન્તનયાન્તદર્શી ॥ ૧૬૨॥

છાયાશરીરે પ્રતિબિમ્બગાત્રે
યત્સ્વપ્નદેહે હૃદિ કલ્પિતાઙ્ગે ।
યથાત્મબુદ્ધિસ્તવ નાસ્તિ કાચિ-
જ્જીવચ્છરીરે ચ તથૈવ માઽસ્તુ ॥ ૧૬૩॥

દેહાત્મધીરેવ નૃણામસદ્ધિયાં
જન્માદિદુઃખપ્રભવસ્ય બીજમ્ ।
યતસ્તતસ્ત્વં જહિ તાં પ્રયત્નાત્
ત્યક્તે તુ ચિત્તે ન પુનર્ભવાશા ॥ ૧૬૪॥

કર્મેન્દ્રિયૈઃ પઞ્ચભિરઞ્ચિતોઽયં
પ્રાણો ભવેત્પ્રાણમયસ્તુ કોશઃ ॥

યેનાત્મવાનન્નમયોઽનુપૂર્ણઃ
પ્રવર્તતેઽસૌ સકલક્રિયાસુ ॥ ૧૬૫॥

નૈવાત્માપિ પ્રાણમયો વાયુવિકારો  var  નૈવાત્માયં
ગન્તાઽઽગન્તા વાયુવદન્તર્બહિરેષઃ ।
યસ્માત્કિઞ્ચિત્ક્વાપિ ન વેત્તીષ્ટમનિષ્ટં
સ્વં વાન્યં વા કિઞ્ચન નિત્યં પરતન્ત્રઃ ॥ ૧૬૬॥

જ્ઞાનેન્દ્રિયાણિ ચ મનશ્ચ મનોમયઃ સ્યાત્
કોશો મમાહમિતિ વસ્તુવિકલ્પહેતુઃ ।
સંજ્ઞાદિભેદકલનાકલિતો બલીયાં-
સ્તત્પૂર્વકોશમભિપૂર્ય વિજૃમ્ભતે યઃ ॥ ૧૬૭॥ અનુપૂર્ય
પઞ્ચેન્દ્રિયૈઃ પઞ્ચભિરેવ હોતૃભિઃ
પ્રચીયમાનો વિષયાજ્યધારયા ।
જાજ્વલ્યમાનો બહુવાસનેન્ધનૈઃ
મનોમયાગ્નિર્દહતિ પ્રપઞ્ચમ્ ॥ ૧૬૮॥ મનોમયોઽગ્નિર્દહતિ
ન હ્યસ્ત્યવિદ્યા મનસોઽતિરિક્તા
મનો હ્યવિદ્યા ભવબન્ધહેતુઃ ।
તસ્મિન્વિનષ્ટે સકલં વિનષ્ટં

વિજૃમ્ભિતેઽસ્મિન્સકલં વિજૃમ્ભતે ॥ ૧૬૯॥

સ્વપ્નેઽર્થશૂન્યે સૃજતિ સ્વશક્ત્યા
ભોક્ત્રાદિવિશ્વં મન એવ સર્વમ્ ।
તથૈવ જાગ્રત્યપિ નો વિશેષઃ
તત્સર્વમેતન્મનસો વિજૃમ્ભણમ્ ॥ ૧૭૦॥

સુષુપ્તિકાલે મનસિ પ્રલીને
નૈવાસ્તિ કિઞ્ચિત્સકલપ્રસિદ્ધેઃ ।
અતો મનઃકલ્પિત એવ પુંસઃ
સંસાર એતસ્ય ન વસ્તુતોઽસ્તિ ॥ ૧૭૧॥

વાયુનાઽઽનીયતે મેઘઃ પુનસ્તેનૈવ નીયતે । var વાયુના નીયતે મેઘઃ પુનસ્તેનૈવ લીયતે
મનસા કલ્પ્યતે બન્ધો મોક્ષસ્તેનૈવ કલ્પ્યતે ॥ ૧૭૨॥

દેહાદિસર્વવિષયે પરિકલ્પ્ય રાગં
બધ્નાતિ તેન પુરુષં પશુવદ્ગુણેન ।
વૈરસ્યમત્ર વિષવત્ સુવિધાય પશ્ચાદ્
એનં વિમોચયતિ તન્મન એવ બન્ધાત્ ॥ ૧૭૩॥

તસ્માન્મનઃ કારણમસ્ય જન્તોઃ
બન્ધસ્ય મોક્ષસ્ય ચ વા વિધાને ।
બન્ધસ્ય હેતુર્મલિનં રજોગુણૈઃ
મોક્ષસ્ય શુદ્ધં વિરજસ્તમસ્કમ્ ॥ ૧૭૪॥

વિવેકવૈરાગ્યગુણાતિરેકા-
ચ્છુદ્ધત્વમાસાદ્ય મનો વિમુક્ત્યૈ ।
ભવત્યતો બુદ્ધિમતો મુમુક્ષો-
સ્તાભ્યાં દૃઢાભ્યાં ભવિતવ્યમગ્રે ॥ ૧૭૫॥

મનો નામ મહાવ્યાઘ્રો વિષયારણ્યભૂમિષુ ।
ચરત્યત્ર ન ગચ્છન્તુ સાધવો યે મુમુક્ષવઃ ॥ ૧૭૬॥

મનઃ પ્રસૂતે વિષયાનશેષાન્
સ્થૂલાત્મના સૂક્ષ્મતયા ચ ભોક્તુઃ ।
શરીરવર્ણાશ્રમજાતિભેદાન્
ગુણક્રિયાહેતુફલાનિ નિત્યમ્ ॥ ૧૭૭॥

અસઙ્ગચિદ્રૂપમમું વિમોહ્ય
 દેહેન્દ્રિયપ્રાણગુણૈર્નિબદ્ધ્ય ।
અહમ્મમેતિ ભ્રમયત્યજસ્રં
 મનઃ સ્વકૃત્યેષુ ફલોપભુક્તિષુ ॥ ૧૭૮॥

અધ્યાસદોષાત્પુરુષસ્ય સંસૃતિઃ var અધ્યાસયોગાત્
 અધ્યાસબન્ધસ્ત્વમુનૈવ કલ્પિતઃ ।
રજસ્તમોદોષવતોઽવિવેકિનો
 જન્માદિદુઃખસ્ય નિદાનમેતત્ ॥ ૧૭૯॥

અતઃ પ્રાહુર્મનોઽવિદ્યાં પણ્ડિતાસ્તત્ત્વદર્શિનઃ ।
યેનૈવ ભ્રામ્યતે વિશ્વં વાયુનેવાભ્રમણ્ડલમ્ ॥ ૧૮૦॥

તન્મનઃશોધનં કાર્યં પ્રયત્નેન મુમુક્ષુણા ।
વિશુદ્ધે સતિ ચૈતસ્મિન્મુક્તિઃ કરફલાયતે ॥ ૧૮૧॥

મોક્ષૈકસક્ત્યા વિષયેષુ રાગં
 નિર્મૂલ્ય સન્ન્યસ્ય ચ સર્વકર્મ ।
સચ્છ્રદ્ધયા યઃ શ્રવણાદિનિષ્ઠો
 રજઃસ્વભાવં સ ધુનોતિ બુદ્ધેઃ ॥ ૧૮૨॥

મનોમયો નાપિ ભવેત્પરાત્મા
 હ્યાદ્યન્તવત્ત્વાત્પરિણામિભાવાત્ ।
દુઃખાત્મકત્વાદ્વિષયત્વહેતોઃ
 દ્રષ્ટા હિ દૃશ્યાત્મતયા ન દૃષ્ટઃ ॥ ૧૮૩॥

બુદ્ધિર્બુદ્ધીન્દ્રિયૈઃ સાર્ધં સવૃત્તિઃ કર્તૃલક્ષણઃ ।
વિજ્ઞાનમયકોશઃ સ્યાત્પુંસઃ સંસારકારણમ્ ॥ ૧૮૪॥

અનુવ્રજચ્ચિત્પ્રતિબિમ્બશક્તિઃ
 વિજ્ઞાનસંજ્ઞઃ પ્રકૃતેર્વિકારઃ ।
જ્ઞાનક્રિયાવાનહમિત્યજસ્રં
 દેહેન્દ્રિયાદિષ્વભિમન્યતે ભૃશમ્ ॥ ૧૮૫॥

અનાદિકાલોઽયમહંસ્વભાવો
 જીવઃ સમસ્તવ્યવહારવોઢા ।
કરોતિ કર્માણ્યપિ પૂર્વવાસનઃ var કર્માણ્યનુ

પુણ્યાન્યપુણ્યાનિ ચ તત્ફલાનિ ॥ ૧૮૬॥

ભુઙ્ક્તે વિચિત્રાસ્વપિ યોનિષુ વ્રજ-
ન્નાયાતિ નિર્યાત્યધ ઊર્ધ્વમેષઃ ।
અસ્યૈવ વિજ્ઞાનમયસ્ય જાગ્રત્-
સ્વપ્નાદ્યવસ્થાઃ સુખદુઃખભોગઃ ॥ ૧૮૭॥

દેહાદિનિષ્ઠાશ્રમધર્મકર્મ-
ગુણાભિમાનઃ સતતં મમેતિ ।
વિજ્ઞાનકોશોઽયમતિપ્રકાશઃ
પ્રકૃષ્ટસાન્નિધ્યવશાત્પરાત્મનઃ ।
અતો ભવત્યેષ ઉપાધિરસ્ય
યદાત્મધીઃ સંસરતિ ભ્રમેણ ॥ ૧૮૮॥

યોઽયં વિજ્ઞાનમયઃ પ્રાણેષુ હૃદિ સ્ફુરત્યયં જ્યોતિઃ । સ્ફુરત્સ્વયઞ્જ્યોતિઃ
કૂટસ્થઃ સન્નાત્મા કર્તા ભોક્તા ભવત્યુપાધિસ્થઃ ॥ ૧૮૯॥

સ્વયં પરિચ્છેદમુપેત્ય બુદ્ધેઃ
તાદાત્મ્યદોષેણ પરં મૃષાત્મનઃ ।
સર્વાત્મકઃ સન્નપિ વીક્ષતે સ્વયં
સ્વતઃ પૃથક્ત્વેન મૃદો ઘટાનિવ ॥ ૧૯૦॥

ઉપાધિસમ્બન્ધવશાત્પરાત્મા
હ્યુપાધિધર્માનનુભાતિ તદ્ગુણઃ । ઽપ્યુપાધિ
અયોવિકારાનવિકારિવહ્નિવત્
સદૈકરૂપોઽપિ પરઃ સ્વભાવાત્ ॥ ૧૯૧॥

શિષ્ય ઉવાચ ।

ભ્રમેણાપ્યન્યથા વાઽસ્તુ જીવભાવઃ પરાત્મનઃ ।
તદુપાધેરનાદિત્વાન્નાનાદેર્નાશ ઇષ્યતે ॥ ૧૯૨॥

અતોઽસ્ય જીવભાવોઽપિ નિત્યા ભવતિ સંસૃતિઃ ।
ન નિવર્તેત તન્મોક્ષઃ કથં મે શ્રીગુરો વદ ॥ ૧૯૩॥

શ્રીગુરુરુવાચ ।

સમ્યક્પૃષ્ટં ત્વયા વિદ્વન્સાવધાનેન તચ્છૃણુ ।
પ્રામાણિકી ન ભવતિ ભ્રાન્ત્યા મોહિતકલ્પના ॥ ૧૯૪॥

ભ્રાન્તિં વિના ત્વસઙ્ગસ્ય નિષ્ક્રિયસ્ય નિરાકૃતેઃ ।
ન ઘટેતાર્થસમ્બન્ધો નભસો નીલતાદિવત્ ॥ ૧૯૫॥

સ્વસ્ય દ્રષ્ટુર્નિર્ગુણસ્યાક્રિયસ્ય
  પ્રત્યગ્બોધાનન્દરૂપસ્ય બુદ્ધેઃ ।
ભ્રાન્ત્યા પ્રાપ્તો જીવભાવો ન સત્યો
  મોહાપાયે નાસ્ત્યવસ્તુસ્વભાવાત્ ॥ ૧૯૬॥

યાવદ્ભ્રાન્તિસ્તાવદેવાસ્ય સત્તા
  મિથ્યાજ્ઞાનોજ્જૃમ્ભિતસ્ય પ્રમાદાત્ ।
રજ્જ્વાં સર્પો ભ્રાન્તિકાલીન એવ
  ભ્રાન્તેર્નાશે નૈવ સર્પોઽપિ તદ્વત્ ॥ ૧૯૭॥ સર્પોઽસ્તિ
અનાદિત્વમવિદ્યાયાઃ કાર્યસ્યાપિ તથેષ્યતે ।
ઉત્પન્નાયાં તુ વિદ્યાયામાવિદ્યકમનાદ્યપિ ॥ ૧૯૮॥

પ્રબોધે સ્વપ્નવત્સર્વં સહમૂલં વિનશ્યતિ ।
અનાદ્યપીદં નો નિત્યં પ્રાગભાવ ઇવ સ્ફુટમ્ ॥ ૧૯૯॥

અનાદેરપિ વિધ્વંસઃ પ્રાગભાવસ્ય વીક્ષિતઃ ।
યદ્બુદ્ધ્યુપાધિસમ્બન્ધાત્પરિકલ્પિતમાત્મનિ ॥ ૨૦૦॥

જીવત્વં ન તતોઽન્યસ્તુ સ્વરૂપેણ વિલક્ષણઃ । તતોઽન્યત્તુ
સમ્બન્ધસ્ત્વાત્મનો બુદ્ધ્યા મિથ્યાજ્ઞાનપુરઃસરઃ ॥ ૨૦૧॥ સમ્બન્ધઃ સ્વાત્મનો
વિનિવૃત્તિર્ભવેત્તસ્ય સમ્યગ્જ્ઞાનેન નાન્યથા ।
બ્રહ્માત્મૈકત્વવિજ્ઞાનં સમ્યગ્જ્ઞાનં શ્રુતેર્મતમ્ ॥ ૨૦૨॥

તદાત્માનાત્મનોઃ સમ્યગ્વિવેકેનૈવ સિધ્યતિ ।
તતો વિવેકઃ કર્તવ્યઃ પ્રત્યગાત્મસદાત્મનોઃ ॥ ૨૦૩॥ પ્રત્યગાત્માસદાત્મનોઃ
જલં પઙ્કવદત્યન્તં પઙ્કાપાયે જલં સ્ફુટમ્ । પઙ્કવદસ્પષ્ટં
યથા ભાતિ તથાત્માપિ દોષાભાવે સ્ફુટપ્રભઃ ॥ ૨૦૪॥

અસન્નિવૃત્તૌ તુ સદાત્મના સ્ફુટં
  પ્રતીતિરેતસ્ય ભવેત્પ્રતીચઃ ।
તતો નિરાસઃ કરણીય એવ
  સદાત્મનઃ સાધ્વહમાદિવસ્તુનઃ ॥ ૨૦૫॥ અસદાત્મનઃ
અતો નાયં પરાત્મા સ્યાદ્વિજ્ઞાનમયશબ્દભાક્ ।
વિકારિત્વાજ્જડત્વાચ્ચ પરિચ્છિન્નત્વહેતુતઃ ।

દૃશ્યત્વાદ્વ્યભિચારિત્વાન્નાનિત્યો નિત્ય ઇષ્યતે ॥ ૨૦૬॥

આનન્દપ્રતિબિમ્બચુમ્બિતતનુર્વૃત્તિસ્તમોજૃમ્ભિતા
સ્યાદાનન્દમયઃ પ્રિયાદિગુણકઃ સ્વેષ્ટાર્થલાભોદયઃ ।
પુણ્યસ્યાનુભવે વિભાતિ કૃતિનામાનન્દરૂપઃ સ્વયં
સર્વો નન્દતિ યત્ર સાધુ તનુભૃન્માત્રઃ પ્રયત્નં વિના ॥ ૨૦૭॥ ભૂત્વા નન્દતિ
આનન્દમયકોશસ્ય સુષુપ્તૌ સ્ફૂર્તિરુત્કટા ।
સ્વપ્નજાગરયોરીષદિષ્ટસન્દર્શનાદિના ॥ ૨૦૮॥

નૈવાયમાનન્દમયઃ પરાત્મા
 સોપાધિકત્વાત્પ્રકૃતેર્વિકારાત્ ।
કાર્યત્વહેતોઃ સુકૃતક્રિયાયા
 વિકારસઙ્ઘાતસમાહિતત્વાત્ ॥ ૨૦૯॥

પઞ્ચાનામપિ કોશાનાં નિષેધે યુક્તિતઃ શ્રુતેઃ । યુક્તિતઃ કૃતે
તન્નિષેધાવધિ સાક્ષી બોધરૂપોઽવશિષ્યતે ॥ ૨૧૦॥ તન્નિષેધાવધિઃ
યોઽયમાત્મા સ્વયઞ્જ્યોતિઃ પઞ્ચકોશવિલક્ષણઃ ।
અવસ્થાત્રયસાક્ષી સન્નિર્વિકારો નિરઞ્જનઃ ।
સદાનન્દઃ સ વિજ્ઞેયઃ સ્વાત્મત્વેન વિપશ્ચિતા ॥ ૨૧૧॥

શિષ્ય ઉવાચ ।
મિથ્યાત્વેન નિષિદ્ધેષુ કોશેષ્વેતેષુ પઞ્ચસુ ।
સર્વાભાવં વિના કિઞ્ચિન્ન પશ્યામ્યત્ર હે ગુરો ।
વિજ્ઞેયં કિમુ વસ્ત્વસ્તિ સ્વાત્મનાઽઽત્મવિપશ્ચિતા ॥ ૨૧૨॥ સ્વાત્મનાત્ર વિપશ્ચિતા
શ્રીગુરુરુવાચ ।
સત્યમુક્તં ત્વયા વિદ્વન્નિપુણોઽસિ વિચારણે ।
અહમાદિવિકારાસ્તે તદભાવોઽયમપ્યનુ ॥ ૨૧૩॥ ઽયમપ્યથ
સર્વે યેનાનુભૂયન્તે યઃ સ્વયં નાનુભૂયતે ।
તમાત્માનં વેદિતારં વિદ્ધિ બુદ્ધ્યા સુસૂક્ષ્મયા ॥ ૨૧૪॥

તત્સાક્ષિકં ભવેત્તત્તદ્યદ્યદ્યેનાનુભૂયતે ।
કસ્યાપ્યનનુભૂતાર્થે સાક્ષિત્વં નોપયુજ્યતે ॥ ૨૧૫॥ નોપપદ્યતે
અસૌ સ્વસાક્ષિકો ભાવો યતઃ સ્વેનાનુભૂયતે ।
અતઃ પરં સ્વયં સાક્ષાત્પ્રત્યગાત્મા ન ચેતરઃ ॥ ૨૧૬॥

જાગ્રત્સ્વપ્નસુષુપ્તિષુ સ્ફુટતરં યોઽસૌ સમુજ્જૃમ્ભતે

પ્રત્યગ્રૂપતયા સદાહમહમિત્યન્તઃ સ્ફુરન્નૈકધા । સ્ફુરન્નેકધા
નાનાકારવિકારભાગિન ઇમાન્ પશ્યન્નહન્ધીમુખાન્ var ભાજિન
નિત્યાનન્દચિદાત્મના સ્ફુરતિ તં વિદ્ધિ સ્વમેતં હૃદિ ॥ ૨૧૭॥

ઘટોદકે બિમ્બિતમર્કબિમ્બ-
માલોક્ય મૂઢો રવિમેવ મન્યતે ।
તથા ચિદાભાસમુપાધિસંસ્થં
ભ્રાન્ત્યાહમિત્યેવ જડોઽભિમન્યતે ॥ ૨૧૮॥

ઘટં જલં તદ્ગતમર્કબિમ્બં
વિહાય સર્વં વિનિરીક્ષ્યતેઽર્કઃ । દિવિ વીક્ષ્યતેઽર્કઃ
તટસ્થ એતત્ત્રિતયાવભાસકઃ var તટસ્થિતઃ તત્ત્રિ
સ્વયમ્પ્રકાશો વિદુષા યથા તથા ॥ ૨૧૯॥

દેહં ધિયં ચિત્પ્રતિબિમ્બમેવં var ચિત્પ્રતિબિમ્બમેતં
વિસૃજ્ય બુદ્ધૌ નિહિતં ગુહાયામ્ ।
દ્રષ્ટારમાત્માનમખણ્ડબોધં
સર્વપ્રકાશં સદસદ્વિલક્ષણમ્ ॥ ૨૨૦॥

નિત્યં વિભું સર્વગતં સુસૂક્ષ્મં
અન્તર્બહિઃશૂન્યમનન્યમાત્મનઃ ।
વિજ્ઞાય સમ્યઙ્નિજરૂપમેતત્
પુમાન્ વિપાપ્મા વિરજો વિમૃત્યુઃ ॥ ૨૨૧॥

વિશોક આનન્દઘનો વિપશ્ચિત્
સ્વયં કુતશ્ચિન્ન બિભેતિ કશ્ચિત્ ।
નાન્યોઽસ્તિ પન્થા ભવબન્ધમુક્તેઃ
વિના સ્વતત્ત્વાવગમં મુમુક્ષોઃ ॥ ૨૨૨॥

બ્રહ્માભિન્નત્વવિજ્ઞાનં ભવમોક્ષસ્ય કારણમ્ ।
યેનાદ્વિતીયમાનન્દં બ્રહ્મ સમ્પદ્યતે બુધૈઃ ॥ ૨૨૩॥ સમ્પદ્યતે બુધઃ
બ્રહ્મભૂતસ્તુ સંસૃત્યૈ વિદ્વાન્નાવર્તતે પુનઃ ।
વિજ્ઞાતવ્યમતઃ સમ્યગ્બ્રહ્માભિન્નત્વમાત્મનઃ ॥ ૨૨૪॥

સત્યં જ્ઞાનમનન્તં બ્રહ્મ વિશુદ્ધં પરં સ્વતઃસિદ્ધમ્ ।
નિત્યાનન્દૈકરસં પ્રત્યગભિન્નં નિરન્તરં જયતિ ॥ ૨૨૫॥

સદિદં પરમાદ્વૈતં સ્વસ્માદન્યસ્ય વસ્તુનોઽભાવાત્ ।
ન હ્યન્યદસ્તિ કિઞ્ચિત્ સમ્યક્ પરમાર્થતત્ત્વબોધદશાયામ્ ॥ ૨૨૬॥ પરતત્ત્વબોધસુદશાયામ્
યદિદં સકલં વિશ્વં નાનારૂપં પ્રતીતમજ્ઞાનાત્ ।
તત્સર્વં બ્રહ્મૈવ પ્રત્યસ્તાશેષભાવનાદોષમ્ ॥ ૨૨૭॥

મૃત્કાર્યભૂતોઽપિ મૃદો ન ભિન્નઃ
કુમ્ભોઽસ્તિ સર્વત્ર તુ મૃત્સ્વરૂપાત્ ।
ન કુમ્ભરૂપં પૃથગસ્તિ કુમ્ભઃ
કુતો મૃષા કલ્પિતનામમાત્રઃ ॥ ૨૨૮॥

કેનાપિ મૃદ્ભિન્નતયા સ્વરૂપં
ઘટસ્ય સન્દર્શયિતું ન શક્યતે ।
અતો ઘટઃ કલ્પિત એવ મોહા-
ન્મૃદેવ સત્યં પરમાર્થભૂતમ્ ॥ ૨૨૯॥

સદ્બ્રહ્મકાર્યં સકલં સદેવં var સદૈવ
તન્માત્રમેતન્ન તતોઽન્યદસ્તિ । સન્માત્રમેતન્ન
અસ્તીતિ યો વક્તિ ન તસ્ય મોહો
વિનિર્ગતો નિદ્રિતવત્પ્રજલ્પઃ ॥ ૨૩૦॥

બ્રહ્મૈવેદં વિશ્વમિત્યેવ વાણી
શ્રૌતી બ્રૂતેઽથર્વનિષ્ઠા વરિષ્ઠા ।
તસ્માદેતદ્બ્રહ્મમાત્રં હિ વિશ્વં
નાધિષ્ઠાનાદ્ભિન્નતાઽઽરોપિતસ્ય ॥ ૨૩૧॥

સત્યં યદિ સ્યાજ્જગદેતદાત્મનોઽ
નન્તત્ત્વહાનિર્નિગમાપ્રમાણતા ।
અસત્યવાદિત્વમપીશિતુઃ સ્યા-
ન્નૈતત્ત્રયં સાધુ હિતં મહાત્મનામ્ ॥ ૨૩૨॥

ઈશ્વરો વસ્તુતત્ત્વજ્ઞો ન ચાહં તેષ્વવસ્થિતઃ ।
ન ચ મત્સ્થાનિ ભૂતાનીત્યેવમેવ વ્યચીક્લૃપત્ ॥ ૨૩૩॥ વ્યચીકથત્
યદિ સત્યં ભવેદ્વિશ્વં સુષુપ્તાવુપલભ્યતામ્ ।
યન્નોપલભ્યતે કિઞ્ચિદતોઽસત્સ્વપ્નવન્મૃષા ॥ ૨૩૪॥

અતઃ પૃથઙ્નાસ્તિ જગત્પરાત્મનઃ
પૃથક્પ્રતીતિસ્તુ મૃષા ગુણાદિવત્ । ગુણાહિવત્

આરોપિતસ્યાસ્તિ કિમર્થવત્તાઽ-
  ધિષ્ઠાનમાભાતિ તથા ભ્રમેણ ॥ ૨૩૫॥

ભ્રાન્તસ્ય યદ્યદ્ભ્રમતઃ પ્રતીતં
  બ્રહ્મૈવ તત્તદ્રજતં હિ શુક્તિઃ ।
ઇદન્તયા બ્રહ્મ સદૈવ રૂપ્યતે var સદેવ
  ત્વારોપિતં બ્રહ્મણિ નામમાત્રમ્ ॥ ૨૩૬॥

અતઃ પરં બ્રહ્મ સદદ્વિતીયં
  વિશુદ્ધવિજ્ઞાનઘનં નિરઞ્જનમ્ ।
પ્રશાન્તમાદ્યન્તવિહીનમક્રિયં
  નિરન્તરાનન્દરસસ્વરૂપમ્ ॥ ૨૩૭॥

નિરસ્તમાયાકૃતસર્વભેદં
  નિત્યં સુખં નિષ્કલમપ્રમેયમ્ । નિત્યં ધ્રુવં
અરૂપમવ્યક્તમનાખ્યમવ્યયં
  જ્યોતિઃ સ્વયં કિઞ્ચિદિદં ચકાસ્તિ ॥ ૨૩૮॥

જ્ઞાતૃજ્ઞેયજ્ઞાનશૂન્યમનન્તં નિર્વિકલ્પકમ્ ।
કેવલાખણ્ડચિન્માત્રં પરં તત્ત્વં વિદુર્બુધાઃ ॥ ૨૩૯॥

અહેયમનુપાદેયં મનોવાચામગોચરમ્ ।
અપ્રમેયમનાદ્યન્તં બ્રહ્મ પૂર્ણમહં મહઃ ॥ ૨૪૦॥ પૂર્ણં મહન્મહઃ
તત્ત્વમ્પદાભ્યામભિધીયમાનયોઃ
  બ્રહ્માત્મનોઃ શોધિતયોર્યદીત્થમ્ । શોધિતયોર્યદિત્થમ્
શ્રુત્યા તયોસ્તત્ત્વમસીતિ સમ્યગ્
  એકત્વમેવ પ્રતિપાદ્યતે મુહુઃ ॥ ૨૪૧-
ઐક્યં તયોર્લક્ષિતયોર્ન વાચ્યયોઃ
  નિગદ્યતેઽન્યોન્યવિરુદ્ધધર્મિણોઃ ।
ખદ્યોતભાન્વોરિવ રાજભૃત્યયોઃ
  કૂપામ્બુરાશ્યોઃ પરમાણુમેર્વોઃ ॥ ૨૪૨॥

તયોર્વિરોધોઽયમુપાધિકલ્પિતો
  ન વાસ્તવઃ કશ્ચિદુપાધિરેષઃ ।
ઈશસ્ય માયા મહદાદિકારણં
  જીવસ્ય કાર્યં શ‍ૃણુ પઞ્ચકોશમ્ ॥ ૨૪૩॥ પઞ્ચકોશાઃ

એતાવુપાધી પરજીવયોસ્તયોઃ
   સમ્યઙ્નિરાસે ન પરો ન જીવઃ ।
રાજ્યં નરેન્દ્રસ્ય ભટસ્ય ખેટક્-
   સ્તયોરપોહે ન ભટો ન રાજા ॥ ૨૪૪॥

અથાત આદેશ ઇતિ શ્રુતિઃ સ્વયં
   નિષેધતિ બ્રહ્મણિ કલ્પિતં દ્વયમ્ ।
શ્રુતિપ્રમાણાનુગૃહીતબોધા- var પ્રમાણાનુગૃહીતયુક્ત્યા
   ત્તયોર્નિરાસઃ કરણીય એવ ॥ ૨૪૫॥

નેદં નેદં કલ્પિતત્વાન્ન સત્યં
   રજ્જુદૃષ્ટવ્યાલવત્સ્વપ્નવચ્ચ । રજ્જૌ
ઇત્થં દૃશ્યં સાધુયુક્ત્યા વ્યપોહ્ય
   જ્ઞેયઃ પશ્ચાદેકભાવસ્તયોર્યઃ ॥ ૨૪૬॥

તતસ્તુ તૌ લક્ષણયા સુલક્ષ્યૌ
   તયોરખણ્ડૈકરસત્વસિદ્ધયે ।
નાલં જહત્યા ન તથાऽજહત્યા
   કિન્તૂભયાર્થાત્મિકયૈવ ભાવ્યમ્ ॥ ૨૪૭॥ ભયાર્થૈકતયૈવ
સ દેવદત્તોऽયમિતીહ ચૈકતા
   વિરુદ્ધધર્માંશમપાસ્ય કથ્યતે ।
યથા તથા તત્ત્વમસીતિવાક્યે
   વિરુદ્ધધર્માનુભયત્ર હિત્વા ॥ ૨૪૮॥

સંલક્ષ્ય ચિન્માત્રતયા સદાત્મનોઃ
   અખણ્ડભાવઃ પરિચીયતે બુધૈઃ ।
એવં મહાવાક્યશતેન કથ્યતે
   બ્રહ્માત્મનોરૈક્યમખણ્ડભાવઃ ॥ ૨૪૯॥

અસ્થૂલમિત્યેતદસન્નિરસ્ય
   સિદ્ધં સ્વતો વ્યોમવદપ્રતર્ક્યમ્ ।
અતો મૃષામાત્રમિદં પ્રતીતં
   જહીહિ યત્સ્વાત્મતયા ગૃહીતમ્ ।
બ્રહ્માહમિત્યેવ વિશુદ્ધબુદ્ધ્યા
   વિદ્ધિ સ્વમાત્માનમખણ્ડબોધમ્ ॥ ૨૫૦॥

મૃત્કાર્યં સકલં ઘટાદિ સતતં મૃન્માત્રમેવાહિતં var મૃન્માત્રમેવાભિતઃ
તદ્વત્સજ્જનિતં સદાત્મકમિદં સન્માત્રમેવાખિલમ્ ।
યસ્માન્નાસ્તિ સતઃ પરં કિમપિ તત્સત્યં સ આત્મા સ્વયં
તસ્માત્તત્ત્વમસિ પ્રશાન્તમમલં બ્રહ્માદ્વયં યત્પરમ્ ॥ ૨૫૧॥

નિદ્રાકલ્પિતદેશકાલવિષયજ્ઞાત્રાદિ સર્વં યથા
મિથ્યા તદ્વદિહાપિ જાગ્રતિ જગત્સ્વાજ્ઞાનકાર્યત્વતઃ ।
યસ્માદેવમિદં શરીરકરણપ્રાણાહમાદ્યપ્યસત્
તસ્માત્તત્ત્વમસિ પ્રશાન્તમમલં બ્રહ્માદ્વયં યત્પરમ્ ॥ ૨૫૨॥

યત્ર ભ્રાન્ત્યા કલ્પિતં તદ્વિવેકે var યદ્વિવેકે
તત્તન્માત્રં નૈવ તસ્માદ્વિભિન્નમ્ ।
સ્વપ્ને નષ્ટે સ્વપ્નવિશ્વં વિચિત્રં
સ્વસ્માદ્ભિન્નં કિન્નુ દૃષ્ટં પ્રબોધે ॥ ૨૫૩॥

જાતિનીતિકુલગોત્રદૂરગં
નામરૂપગુણદોષવર્જિતમ્ ।
દેશકાલવિષયાતિવર્તિ યદ્
બ્રહ્મ તત્ત્વમસિ ભાવયાત્મનિ ॥ ૨૫૪॥

યત્પરં સકલવાગગોચરં
ગોચરં વિમલબોધચક્ષુષઃ ।
શુદ્ધચિદ્ઘનમનાદિ વસ્તુ યદ્
બ્રહ્મ તત્ત્વમસિ ભાવયાત્મનિ ॥ ૨૫૫॥

ષડ્ભિરૂર્મિભિરયોગિ યોગિહૃદ્-
ભાવિતં ન કરણૈર્વિભાવિતમ્ ।
બુદ્ધ્યવેદ્યમનવદ્યમસ્તિ યદ્ var ભૂતિ યદ્
બ્રહ્મ તત્ત્વમસિ ભાવયાત્મનિ ॥ ૨૫૬॥

ભ્રાન્તિકલ્પિતજગત્કલાશ્રયં
સ્વાશ્રયં ચ સદસદ્વિલક્ષણમ્ ।
નિષ્કલં નિરુપમાનવદ્ધિ યદ્ var નિરુપમાનમૃદ્ધિમત્
બ્રહ્મ તત્ત્વમસિ ભાવયાત્મનિ ॥ ૨૫૭॥

જન્મવૃદ્ધિપરિણત્યપક્ષય-
વ્યાધિનાશનવિહીનમવ્યયમ્ ।

વિશ્વસૃષ્ટ્યવવિઘાતકારણં var વનઘાતકારણં
　બ્રહ્મ તત્ત્વમસિ ભાવયાત્મનિ ॥ ૨૫૮॥

અસ્તભેદમનપાસ્તલક્ષણં
　નિસ્તરઙ્ગજલરાશિનિશ્ચલમ્ ।
નિત્યમુક્તમવિભક્તમૂર્તિ યદ્
　બ્રહ્મ તત્ત્વમસિ ભાવયાત્મનિ ॥ ૨૫૯॥

એકમેવ સદનેકકારણં
　કારણાન્તરનિરાસ્યકારણમ્ । સકારણમ્
કાર્યકારણવિલક્ષણં સ્વયં
　બ્રહ્મ તત્ત્વમસિ ભાવયાત્મનિ ॥ ૨૬૦॥

નિર્વિકલ્પકમનલ્પમક્ષરં
　યત્ક્ષરાક્ષરવિલક્ષણં પરમ્ ।
નિત્યમવ્યયસુખં નિરઞ્જનં
　બ્રહ્મ તત્ત્વમસિ ભાવયાત્મનિ ॥ ૨૬૧॥

યદ્વિભાતિ સદનેકધા ભ્રમા-
　ન્નામરૂપગુણવિક્રિયાત્મના ।
હેમવત્સ્વયમવિક્રિયં સદા
　બ્રહ્મ તત્ત્વમસિ ભાવયાત્મનિ ॥ ૨૬૨॥

યચ્ચકાસ્ત્યનપરં પરાત્પરં
　પ્રત્યગેકરસમાત્મલક્ષણમ્ ।
સત્યચિત્સુખમનન્તમવ્યયં
　બ્રહ્મ તત્ત્વમસિ ભાવયાત્મનિ ॥ ૨૬૩॥

ઉક્તમર્થમિમમાત્મનિ સ્વયં
　ભાવયેત્પ્રથિતયુક્તિભિર્ધિયા । ભાવય પ્રથિત
સંશયાદિરહિતં કરામ્બુવત્
　તેન તત્ત્વનિગમો ભવિષ્યતિ ॥ ૨૬૪॥

સમ્બોધમાત્રં પરિશુદ્ધતત્ત્વં var સ્વં બોધમાત્રં
　વિજ્ઞાય સઙ્ઘે નૃપવચ્ચ સૈન્યે ।
તદાશ્રયઃ સ્વાત્મનિ સર્વદા સ્થિતો var તદાત્મનૈવાત્મનિ
　વિલાપય બ્રહ્મણિ વિશ્વજાતમ્ ॥ ૨૬૫॥ દૃશ્યજાતમ્

બુદ્ધૌ ગુહાયાં સદસદ્વિલક્ષણં
   બ્રહ્માસ્તિ સત્યં પરમદ્વિતીયમ્ ।
તદાત્મના યોઽત્ર વસેદ્ગુહાયાં
   પુનર્ન તસ્યાઙ્ગગુહાપ્રવેશઃ ॥ ૨૬૬॥

જ્ઞાતે વસ્તુન્યપિ બલવતી વાસનાઽનાદિરેષા
કર્તા ભોક્તાપ્યહમિતિ દૃઢા યાઽસ્ય સંસારહેતુઃ ।
પ્રત્યગ્દૃષ્ટ્યાઽઽત્મનિ નિવસતા સાપનેયા પ્રયત્ના-
ન્મુક્તિં પ્રાહુસ્તદિહ મુનયો વાસનાતાનવં યત્ ॥ ૨૬૭॥

અહં મમેતિ યો ભાવો દેહાક્ષાદાવનાત્મનિ ।
અધ્યાસોઽયં નિરસ્તવ્યો વિદુષા સ્વાત્મનિષ્ઠયા ॥ ૨૬૮॥

જ્ઞાત્વા સ્વં પ્રત્યગાત્માનં બુદ્ધિતદ્વૃત્તિસાક્ષિણમ્ ।
સોઽહમિત્યેવ સદ્વૃત્ત્યાઽનાત્મન્યાત્મમતિં જહિ ॥ ૨૬૯॥

લોકાનુવર્તનં ત્યક્ત્વા ત્યક્ત્વા દેહાનુવર્તનમ્ ।
શાસ્ત્રાનુવર્તનં ત્યક્ત્વા સ્વાધ્યાસાપનયં કુરુ ॥ ૨૭૦॥

લોકવાસનયા જન્તોઃ શાસ્ત્રવાસનયાપિ ચ ।
દેહવાસનયા જ્ઞાનં યથાવન્નૈવ જાયતે ॥ ૨૭૧
સંસારકારાગૃહમોક્ષમિચ્છો-
   રયોમયં પાદનિબન્ધશૃઙ્ખલમ્ । નિબદ્ધ
વદન્તિ તજ્જ્ઞાઃ પટુ વાસનાત્રયં
   યોઽસ્માદ્વિમુક્તઃ સમુપૈતિ મુક્તિમ્ ॥ ૨૭૨॥

જલાદિસંસર્ગવશાત્પ્રભૂત- var જલાદિસમ્પર્કવશાત્
   દુર્ગન્ધધૂતાઽગરુદિવ્યવાસના ।
સઙ્ઘર્ષણેનૈવ વિભાતિ સમ્ય-
   ગ્વિધૂયમાને સતિ બાહ્યગન્ધે ॥ ૨૭૩॥

અન્તઃશ્રિતાનન્તદુરન્તવાસના-
   ધૂલીવિલિપ્તા પરમાત્મવાસના ।
પ્રજ્ઞાતિસઙ્ઘર્ષણતો વિશુદ્ધા
   પ્રતીયતે ચન્દનગન્ધવત્ સ્ફુટમ્ ॥ ૨૭૪॥ સ્ફુટા
અનાત્મવાસનાજાલૈસ્તિરોભૂતાત્મવાસના ।
નિત્યાત્મનિષ્ઠયા તેષાં નાશે ભાતિ સ્વયં સ્ફુટમ્ ॥ ૨૭૫॥ સ્ફુટા

યથા યથા પ્રત્યગવસ્થિતં મનઃ
  તથા તથા મુઞ્ચતિ બાહ્યવાસનામ્ । બાહ્યવાસનાઃ
નિઃશેષમોક્ષે સતિ વાસનાનાં
  આત્માનુભૂતિઃ પ્રતિબન્ધશૂન્યા ॥ ૨૭૬॥

સ્વાત્મન્યેવ સદા સ્થિત્વા મનો નશ્યતિ યોગિનઃ । સ્થિત્વા
વાસનાનાં ક્ષયશ્ચાતઃ સ્વાધ્યાસાપનયં કુરુ ॥ ૨૭૭॥

તમો દ્વાભ્યાં રજઃ સત્ત્વાત્સત્ત્વં શુદ્ધેન નશ્યતિ ।
તસ્માત્સત્ત્વમવષ્ટભ્ય સ્વાધ્યાસાપનયં કુરુ ॥ ૨૭૮॥

પ્રારબ્ધં પુષ્યતિ વપુરિતિ નિશ્ચિત્ય નિશ્ચલઃ ।
ધૈર્યમાલમ્બ્ય યત્નેન સ્વાધ્યાસાપનયં કુરુ ॥ ૨૭૯॥

નાહં જીવઃ પરં બ્રહ્મેત્યતદ્વ્યાવૃત્તિપૂર્વકમ્ ।
વાસનાવેગતઃ પ્રાપ્તસ્વાધ્યાસાપનયં કુરુ ॥ ૨૮૦॥

શ્રુત્યા યુક્ત્યા સ્વાનુભૂત્યા જ્ઞાત્વા સાર્વાત્મ્યમાત્મનઃ ।
ક્વચિદાભાસતઃ પ્રાપ્તસ્વાધ્યાસાપનયં કુરુ ॥ ૨૮૧॥

અનાદાનવિસર્ગાભ્યામીષન્નાસ્તિ ક્રિયા મુનેઃ । અન્નાદાનવિસર્ગા
તદેકનિષ્ઠયા નિત્યં સ્વાધ્યાસાપનયં કુરુ ॥ ૨૮૨॥

તત્ત્વમસ્યાદિવાક્યોત્થબ્રહ્માત્મૈકત્વબોધતઃ ।
બ્રહ્મણ્યાત્મત્વદાર્ઢ્યાય સ્વાધ્યાસાપનયં કુરુ ॥ ૨૮૩॥

અહમ્ભાવસ્ય દેહેઽસ્મિન્નિઃશેષવિલયાવધિ ।
સાવધાનેન યુક્તાત્મા સ્વાધ્યાસાપનયં કુરુ ॥ ૨૮૪॥

પ્રતીતિર્જીવજગતોઃ સ્વપ્નવદ્ભાતિ યાવતા ।
તાવન્નિરન્તરં વિદ્વન્સ્વાધ્યાસાપનયં કુરુ ॥ ૨૮૫॥

નિદ્રાયા લોકવાર્તાયાઃ શબ્દાદેરપિ વિસ્મૃતેઃ ।
ક્વચિન્નાવસરં દત્ત્વા ચિન્તયાત્માનમાત્મનિ ॥ ૨૮૬॥

માતાપિત્રોર્મલોદ્ભૂતં મલમાંસમયં વપુઃ ।
ત્યક્ત્વા ચાણ્ડાલવદ્દૂરં બ્રહ્મીભૂય કૃતી ભવ ॥ ૨૮૭॥

ઘટાકાશં મહાકાશ ઇવાત્માનં પરાત્મનિ ।
વિલાપ્યાખણ્ડભાવેન તૂષ્ણી ભવ સદા મુને ॥ ૨૮૮॥ તૂષ્ણીં

સ્વપ્રકાશમધિષ્ઠાનં સ્વયમ્ભૂય સદાત્મના ।
બ્રહ્માણ્ડમપિ પિણ્ડાણ્ડં ત્યજ્યતાં મલભાણ્ડવત્ ॥ ૨૮૯॥

ચિદાત્મનિ સદાનન્દે દેહારૂઢામહન્ધિયમ્ ।
નિવેશ્ય લિઙ્ગમુત્સૃજ્ય કેવલો ભવ સર્વદા ॥ ૨૯૦॥

યત્રૈષ જગદાભાસો દર્પણાન્તઃ પુરં યથા ।
તદ્બ્રહ્માહમિતિ જ્ઞાત્વા કૃતકૃત્યો ભવિષ્યસિ ॥ ૨૯૧॥

યત્સત્યભૂતં નિજરૂપમાદ્યં
ચિદદ્વયાનન્દમરૂપમક્રિયમ્ ।
તદેત્ય મિથ્યાવપુરુત્સૃજેત var સૃજૈત
શૈલૂષવદ્વેષમુપાત્તમાત્મનઃ ॥ ૨૯૨॥

સર્વાત્મના દૃશ્યમિદં મૃષૈવ
નૈવાહમર્થઃ ક્ષણિકત્વદર્શનાત્ ।
જાનામ્યહં સર્વમિતિ પ્રતીતિઃ
કુતોઽહમાદેઃ ક્ષણિકસ્ય સિધ્યેત્ ॥ ૨૯૩॥

અહમ્પદાર્થસ્ત્વહમાદિસાક્ષી
નિત્યં સુષુપ્તાવપિ ભાવદર્શનાત્ ।
બ્રૂતે હ્યજો નિત્ય ઇતિ શ્રુતિઃ સ્વયં
તત્પ્રત્યગાત્મા સદસદ્વિલક્ષણઃ ॥ ૨૯૪॥

વિકારિણાં સર્વવિકારવેત્તા
નિત્યાવિકારો ભવિતું સમર્હતિ । નિત્યોઽવિકારો
મનોરથસ્વપ્નસુષુપ્તિષુ સ્ફુટં
પુનઃ પુનર્દૃષ્ટમસત્ત્વમેતયોઃ ॥ ૨૯૫॥

અતોઽભિમાનં ત્યજ માંસપિણ્ડે
પિણ્ડાભિમાનિન્યપિ બુદ્ધિકલ્પિતે ।
કાલત્રયાબાધ્યમખણ્ડબોધં
જ્ઞાત્વા સ્વમાત્માનમુપૈહિ શાન્તિમ્ ॥ ૨૯૬॥

ત્યજાભિમાનં કુલગોત્રનામ-
રૂપાશ્રમેષ્વાર્દ્રશવાશ્રિતેષુ ।
લિઙ્ગસ્ય ધર્માનપિ કર્તૃતાદીં-

સ્ત્યક્ત્વા ભવાખણ્ડસુખસ્વરૂપઃ ॥ ૨૯૭॥

સન્ત્યન્યે પ્રતિબન્ધાઃ પુંસઃ સંસારહેતવો દૃષ્ટાઃ ।
તેષામેવં મૂલં પ્રથમવિકારો ભવત્યહઙ્કારઃ ॥ ૨૯૮॥ તેષામેષાં
યાવત્સ્યાત્સ્વસ્ય સમ્બન્ધોઽહઙ્કારેણ દુરાત્મના ।
તાવન્ન લેશમાત્રાપિ મુક્તિવાર્તા વિલક્ષણા ॥ ૨૯૯॥

અહઙ્કારગ્રહાન્મુક્તઃ સ્વરૂપમુપપદ્યતે ।
ચન્દ્રવદ્વિમલઃ પૂર્ણઃ સદાનન્દઃ સ્વયમ્પ્રભઃ ॥ ૩૦૦॥

યો વા પુરે સોઽહમિતિ પ્રતીતો var પુરૈષોઽહમિતિ
બુદ્ધ્યા પ્રક્લૃપ્તસ્તમસાઽતિમૂઢયા । બુદ્ધ્યાઽવિવિક્તસ્તમસા
તસ્યૈવ નિઃશેષતયા વિનાશે
બ્રહ્માત્મભાવઃ પ્રતિબન્ધશૂન્યઃ ॥ ૩૦૧॥

બ્રહ્માનન્દનિધિર્મહાબલવતાઽહઙ્કારઘોરાહિના
સંવેષ્ટ્યાત્મનિ રક્ષ્યતે ગુણમયૈશ્ચણ્ડેસ્ત્રિભિર્મસ્તકૈઃ var ચણ્ડૈ
વિજ્ઞાનાખ્યમહાસિના શ્રુતિમતા વિચ્છિદ્ય શીર્ષત્રયં var દ્યુતિમતા
નિર્મૂલ્યાહિમિમં નિધિં સુખકરં ધીરોઽનુભોક્તુઙ્ક્ષમઃ ॥ ૩૦૨॥

યાવદ્વા યત્કિઞ્ચિદ્વિષદોષસ્ફૂર્તિરસ્તિ ચેદ્દેહે ।
કથમારોગ્યાય ભવેત્તદ્વદહન્તાપિ યોગિનો મુક્ત્યૈ ॥ ૩૦૩॥

અહમોઽત્યન્તનિવૃત્ત્યા તત્કૃતનાનાવિકલ્પસંહૃત્યા ।
પ્રત્યક્તત્ત્વવિવેકાદિદમહમસ્મીતિ વિન્દતે તત્ત્વમ્ ॥ ૩૦૪॥ વિવેકાદયમ્
અહઙ્કારે કર્તર્યહમિતિ મતિં મુઞ્ચ સહસા var અહઙ્કર્તર્યસ્મિન્નહમિતિ
વિકારાત્મન્યાત્મપ્રતિફલજુષિ સ્વસ્થિતિમુષિ ।
યદધ્યાસાત્પ્રાપ્તા જનિમૃતિજરાદુઃખબહુલા
પ્રતીચશ્ચિન્મૂર્તેસ્તવ સુખતનોઃ સંસૃતિરિયમ્ ॥ ૩૦૫॥

સદૈકરૂપસ્ય ચિદાત્મનો વિભો-
રાનન્દમૂર્તેરનવદ્યકીર્તેઃ ।
નૈવાન્યથા ક્વાપ્યવિકારિણસ્તે
વિનાહમધ્યાસમમુષ્ય સંસૃતિઃ ॥ ૩૦૬॥

તસ્માદહઙ્કારમિમં સ્વશત્રું
ભોક્તુર્ગલે કણ્ટકવત્પ્રતીતમ્ ।

વિચ્છિદ્ય વિજ્ઞાનમહાસિના સ્ફુટં
   ભુઙ્ક્ષ્વાત્મસામ્રાજ્યસુખં યથેષ્ટમ્ ॥ ૩૦૭॥

તતોઽહમાદેર્વિનિવર્ત્ય વૃત્તિં
   સન્ત્યક્તરાગઃ પરમાર્થલાભાત્ ।
તૂષ્ણીં સમાસ્સ્વાત્મસુખાનુભૂત્યા
   પૂર્ણાત્મના બ્રહ્મણિ નિર્વિકલ્પઃ ॥ ૩૦૮॥

સમૂલકૃત્તોઽપિ મહાનહં પુનઃ
   વ્યુલ્લેખિતઃ સ્યાદ્યદિ ચેતસા ક્ષણમ્ ।
સઞ્જીવ્ય વિક્ષેપશતં કરોતિ
   નભસ્વતા પ્રાવૃષિ વારિદો યથા ॥ ૩૦૯॥

નિગૃહ્ય શત્રોરહમોઽવકાશઃ
   ક્વચિન્ન દેયો વિષયાનુચિન્તયા ।
સ એવ સઞ્જીવનહેતુરસ્ય
   પ્રક્ષીણજમ્બીરતરોરિવામ્બુ ॥ ૩૧૦॥

દેહાત્મના સંસ્થિત એવ કામી
   વિલક્ષણઃ કામયિતા કથં સ્યાત્ ।
અતોઽર્થસન્ધાનપરત્વમેવ
   ભેદપ્રસક્ત્યા ભવબન્ધહેતુઃ ॥ ૩૧૧॥

કાર્યપ્રવર્ધનાદ્બીજપ્રવૃદ્ધિઃ પરિદૃશ્યતે ।
કાર્યનાશાદ્બીજનાશસ્તસ્માત્કાર્યં નિરોધયેત્ ॥ ૩૧૨॥

વાસનાવૃદ્ધિતઃ કાર્યં કાર્યવૃદ્ધ્યા ચ વાસના ।
વર્ધતે સર્વથા પુંસઃ સંસારો ન નિવર્તતે ॥ ૩૧૩॥

સંસારબન્ધવિચ્છિત્ત્યૈ તદ્ દ્વયં પ્રદહેદ્યતિઃ ।
વાસનાવૃદ્ધિરેતાભ્યાં ચિન્તયા ક્રિયયા બહિઃ ॥ ૩૧૪॥ વાસના પ્રેર્યતે હ્યન્તઃ
તાભ્યાં પ્રવર્ધમાના સા સૂતે સંસૃતિમાત્મનઃ ।
ત્રયાણાં ચ ક્ષયોપાયઃ સર્વાવસ્થાસુ સર્વદા ॥ ૩૧૫॥

સર્વત્ર સર્વતઃ સર્વબ્રહ્મમાત્રાવલોકનૈઃ । માત્રાવલોકનમ્
સદ્ભાવવાસનાદાર્ઢ્યાત્તત્રયં લયમશ્નુતે ॥ ૩૧૬॥

ક્રિયાનાશે ભવેચ્ચિન્તાનાશોઽસ્માદ્વાસનાક્ષયઃ ।

વાસનાપ્રક્ષયો મોક્ષઃ સા જીવન્મુક્તિરિષ્યતે ॥ ૩૧૭॥ સ

સદ્વાસનાસ્ફૂર્તિવિજૃમ્ભણે સતિ
  હ્યસૌ વિલીનાપ્યહમાદિવાસના । વિલીના ત્વહમાદિવાસના
અતિપ્રકૃષ્ટાપ્યરુણપ્રભાયાં
  વિલીયતે સાધુ યથા તમિસ્રા ॥ ૩૧૮॥

તમસ્તમઃકાર્યમનર્થજાલં
  ન દૃશ્યતે સત્યુદિતે દિનેશે ।
તથાઽદ્વયાનન્દરસાનુભૂતૌ
  નૈવાસ્તિ બન્ધો ન ચ દુઃખગન્ધઃ ॥ ૩૧૯॥

દૃશ્યં પ્રતીતં પ્રવિલાપયન્સન્ var પ્રવિલાપયન્સ્વયં
  સન્માત્રમાનન્દઘનં વિભાવયન્ ।
સમાહિતઃ સન્બહિરન્તરં વા
  કાલં નયેથાઃ સતિ કર્મબન્ધે ॥ ૩૨૦॥

પ્રમાદો બ્રહ્મનિષ્ઠાયાં ન કર્તવ્યઃ કદાચન ।
પ્રમાદો મૃત્યુરિત્યાહ ભગવાન્બ્રહ્મણઃ સુતઃ ॥ ૩૨૧॥

ન પ્રમાદાદનર્થોઽન્યો જ્ઞાનિનઃ સ્વસ્વરૂપતઃ ।
તતો મોહસ્તતોઽહન્ધીસ્તતો બન્ધસ્તતો વ્યથા ॥ ૩૨૨॥

વિષયાભિમુખં દૃષ્ટ્વા વિદ્વાંસમપિ વિસ્મૃતિઃ ।
વિક્ષેપયતિ ધીદોષૈર્યોષા જારમિવ પ્રિયમ્ ॥ ૩૨૩॥

યથાપકૃષ્ટં શૈવાલં ક્ષણમાત્રં ન તિષ્ઠતિ ।
આવૃણોતિ તથા માયા પ્રાજ્ઞં વાપિ પરાઙ્મુખમ્ ॥ ૩૨૪॥

લક્ષ્યચ્યુતં ચેદ્યદિ ચિત્તમીષદ્
  બહિર્મુખં સન્નિપતેત્તતસ્તતઃ ।
પ્રમાદતઃ પ્રચ્યુતકેલિકન્દુકઃ
  સોપાનપઙ્ક્તૌ પતિતો યથા તથા ॥ ૩૨૫॥

વિષયેષ્વાવિશચ્ચેતઃ સઙ્કલ્પયતિ તદ્ગુણાન્ ।
સમ્યક્સઙ્કલ્પનાત્કામઃ કામાત્પુંસઃ પ્રવર્તનમ્ ॥ ૩૨૬॥

અતઃ પ્રમાદાન્ન પરોઽસ્તિ મૃત્યુઃ
  વિવેકિનો બ્રહ્મવિદઃ સમાધૌ ।

સમાહિતઃ સિદ્ધિમુપૈતિ સમ્યક્
   સમાહિતાત્મા ભવ સાવધાનઃ ॥ ૩૨૭॥

તતઃ સ્વરૂપવિભ્રંશો વિભ્રષ્ટસ્તુ પતત્યધઃ ।
પતિતસ્ય વિના નાશં પુનર્નારોહ ઈક્ષ્યતે ॥ ૩૨૮॥

સઙ્કલ્પં વર્જયેત્તસ્માત્સર્વાનર્થસ્ય કારણમ્ ।
અપથ્યાનિ હિ વસ્તૂનિ વ્યાધિગ્રસ્તો યથોત્સૃજે ।  extra verse number variation
જીવતો યસ્ય કૈવલ્યં વિદેહે સ ચ કેવલઃ ।
યત્કિઞ્ચિત્ પશ્યતો ભેદં ભયં બ્રૂતે યજુઃશ્રુતિઃ ॥ ૩૨૯॥

યદા કદા વાપિ વિપશ્ચિદેષ
   બ્રહ્મણ્યનન્તેઽપ્યણુમાત્રભેદમ્ ।
પશ્યત્યથામુષ્ય ભયં તદૈવ
   યદ્વીક્ષિતં ભિન્નતયા પ્રમાદાત્ ॥ ૩૩૦॥  યદીક્ષિતં
શ્રુતિસ્મૃતિન્યાયશતૈર્નિષિદ્ધે
   દૃશ્યેઽત્ર યઃ સ્વાત્મમતિં કરોતિ ।
ઉપૈતિ દુઃખોપરિ દુઃખજાતં
   નિષિદ્ધકર્તા સ મલિમ્લુચો યથા ॥ ૩૩૧॥

સત્યાભિસન્ધાનરતો વિમુક્તો
   મહત્ત્વમાત્મીયમુપૈતિ નિત્યમ્ ।
મિથ્યાભિસન્ધાનરતસ્તુ નશ્યેદ્
   દૃષ્ટં તદેતદ્યદચૌરચૌરયોઃ ॥ ૩૩૨॥  ચોરચોરયોઃ
યતિરસદનુસન્ધિં બન્ધહેતું વિહાય
   સ્વયમયમહમસ્મીત્યાત્મદૃષ્ટ્યૈવ તિષ્ઠેત્
સુખયતિ નનુ નિષ્ઠા બ્રહ્મણિ સ્વાનુભૂત્યા
   હરતિ પરમવિદ્યાકાર્યદુઃખં પ્રતીતમ્ ॥ ૩૩૩॥

બાહ્યાનુસન્ધિઃ પરિવર્ધયેત્ફલં  var  બાહ્યાભિસન્ધિઃ
   દુર્વાસનામેવ તતસ્તતોઽધિકામ્ ।
જ્ઞાત્વા વિવેકૈઃ પરિહૃત્ય બાહ્યં
   સ્વાત્માનુસન્ધિં વિદધીત નિત્યમ્ ॥ ૩૩૪॥

બાહ્યે નિરુદ્ધે મનસઃ પ્રસન્નતા
   મનઃપ્રસાદે પરમાત્મદર્શનમ્ ।

તસ્મિન્સુદૃષ્ટે ભવબન્ધનાશો
   બહિર્નિરોધઃ પદવી વિમુક્તેઃ ॥ ૩૩૫॥

કઃ પણ્ડિતઃ સન્સદસદ્વિવેકી
   શ્રુતિપ્રમાણઃ પરમાર્થદર્શી ।
જાનન્હિ કુર્યાદસતોઽવલમ્બં
   સ્વપાતહેતોઃ શિશુવન્મુમુક્ષુઃ ॥ ૩૩૬॥

દેહાદિસંસક્તિમતો ન મુક્તિઃ
   મુક્તસ્ય દેહાદ્યભિમત્યભાવઃ ।
સુપ્તસ્ય નો જાગરણં ન જાગ્રતઃ
   સ્વપ્નસ્તયોર્ભિન્નગુણાશ્રયત્વાત્ ॥ ૩૩૭॥

અન્તર્બહિઃ સ્વં સ્થિરજઙ્ગમેષુ
   જ્ઞાત્વાઽઽત્મનાધારતયા વિલોક્ય । જ્ઞાનાત્મન્
ત્યક્તાખિલોપાધિરખણ્ડરૂપઃ
   પૂર્ણાત્મના યઃ સ્થિત એષ મુક્તઃ ॥ ૩૩૮॥

સર્વાત્મના બન્ધવિમુક્તિહેતુઃ
   સર્વાત્મભાવાન્ન પરોઽસ્તિ કશ્ચિત્ ।
દૃશ્યાગ્રહે સત્યુપપદ્યતેઽસૌ
   સર્વાત્મભાવોઽસ્ય સદાત્મનિષ્ઠયા ॥ ૩૩૯॥

દૃશ્યસ્યાગ્રહણં કથં નુ ઘટતે દેહાત્મના તિષ્ઠતો
બાહ્યાર્થાનુભવપ્રસક્તમનસસ્તત્તત્ક્રિયાં કુર્વતઃ ।
સન્ન્યસ્તાખિલધર્મકર્મવિષયૈર્નિત્યાત્મનિષ્ઠાપરૈઃ
તત્ત્વજ્ઞૈઃ કરણીયમાત્મનિ સદાનન્દેચ્છુભિર્યત્નતઃ ॥ ૩૪૦॥

સર્વાત્મસિદ્ધયે ભિક્ષોઃ કૃતશ્રવણકર્મણઃ । સાર્વાત્મ્ય
સમાધિં વિદધાત્યેષા શાન્તો દાન્ત ઇતિ શ્રુતિઃ ॥ ૩૪૧॥

આરૂઢશક્તેરહમો વિનાશઃ
   કર્તુન્ન શક્ય સહસાપિ પણ્ડિતૈઃ । કર્તું ન
યે નિર્વિકલ્પાખ્યસમાધિનિશ્ચલાઃ
   તાનન્તરાઽનન્તભવા હિ વાસનાઃ ॥ ૩૪૨॥

અહમ્બુદ્ધ્યૈવ મોહિન્યા યોજયિત્વાઽઽવૃતેર્બલાત્ ।

વિક્ષેપશક્તિઃ પુરુષં વિક્ષેપયતિ તદ્ગુણૈઃ ॥ ૩૪૩॥

વિક્ષેપશક્તિવિજયો વિષમો વિધાતું
  નિઃશેષમાવરણશક્તિનિવૃત્ત્યભાવે ।
દૃગ્દૃશ્યયોઃ સ્ફુટપયોજલવદ્વિભાગે
  નશ્યેત્તદાવરણમાત્મનિ ચ સ્વભાવાત્ ।
નિઃસંશયેન ભવતિ પ્રતિબન્ધશૂન્યો
  વિક્ષેપણં ન હિ તદા યદિ ચેન્મૃષાર્થે ॥ ૩૪૪॥ નિક્ષેપણં
સમ્યગ્વિવેકઃ સ્ફુટબોધજન્યો
  વિભજ્ય દૃગ્દૃશ્યપદાર્થતત્ત્વમ્ ।
છિનત્તિ માયાકૃતમોહબન્ધં
  યસ્માદ્વિમુક્તસ્તુ પુનર્ન સંસૃતિઃ ॥ ૩૪૫॥ વિમુક્તસ્ય
પરાવરૈકત્વવિવેકવહ્નિઃ
  દહત્યવિદ્યાગહનં હ્યશેષમ્ ।
કિં સ્યાત્પુનઃ સંસરણસ્ય બીજં
  અદ્વૈતભાવં સમુપેયુષોઽસ્ય ॥ ૩૪૬॥

આવરણસ્ય નિવૃત્તિર્ભવતિ હિ સમ્યક્પદાર્થદર્શનતઃ ।
મિથ્યાજ્ઞાનવિનાશસ્તદ્વિક્ષેપજનિતદુઃખનિવૃત્તિઃ ॥ ૩૪૭॥

એતત્ત્રિતયં દૃષ્ટં સમ્યગ્રજ્જુસ્વરૂપવિજ્ઞાનાત્ ।
તસ્માદ્વસ્તુસતત્ત્વં જ્ઞાતવ્યં બન્ધમુક્તયે વિદુષા ॥ ૩૪૮॥

અયોઽગ્નિયોગાદિવ સત્સમન્વયાન્
  માત્રાદિરૂપેણ વિજૃમ્ભતે ધીઃ ।
તત્કાર્યમેતદ્દ્વિતયં યતો મૃષા var તત્કાર્યમેવ ત્રિતયં
  દૃષ્ટં ભ્રમસ્વપ્નમનોરથેષુ ॥ ૩૪૯॥

તતો વિકારાઃ પ્રકૃતેરહમ્મુખા
  દેહાવસાના વિષયાશ્ચ સર્વે ।
ક્ષણેઽન્યથાભાવિતયા હ્યમીષા- var ભાવિન એષ આત્મા
  મસત્ત્વમાત્મા તુ કદાપિ નાન્યથા ॥ ૩૫૦॥ મસત્ત્વમાત્મા તુ કદાપિ
નિત્યાદ્વયાખણ્ડચિદેકરૂપો
  બુદ્ધ્યાદિસાક્ષી સદસદ્વિલક્ષણઃ ।
અહમ્પદપ્રત્યયલક્ષિતાર્થઃ

પ્રત્યક્ સદાનન્દઘનઃ પરાત્મા ॥ ૩૫૧॥

ઇત્થં વિપશ્ચિત્સદસદ્વિભજ્ય
નિશ્ચિત્ય તત્ત્વં નિજબોધદૃષ્ટ્યા ।
જ્ઞાત્વા સ્વમાત્માનમખણ્ડબોધં
તેભ્યો વિમુક્તઃ સ્વયમેવ શામ્યતિ ॥ ૩૫૨॥

અજ્ઞાનહૃદયગ્રન્થેર્નિઃશેષવિલયસ્તદા ।
સમાધિનાऽવિકલ્પેન યદાऽદ્વૈતાત્મદર્શનમ્ ॥ ૩૫૩॥

ત્વમહમિદમિતીયં કલ્પના બુદ્ધિદોષાત્
પ્રભવતિ પરમાત્મન્યદ્વયે નિર્વિશેષે ।
પ્રવિલસતિ સમાધાવસ્ય સર્વો વિકલ્પો
વિલયનમુપગચ્છેદ્વસ્તુતત્ત્વાવધૃત્યા ॥ ૩૫૪॥

શાન્તો દાન્તઃ પરમુપરતઃ ક્ષાન્તિયુક્તઃ સમાધિં
કુર્વન્નિત્યં કલયતિ યતિઃ સ્વસ્ય સર્વાત્મભાવમ્ ।
તેનાવિદ્યાતિમિરજનિતાન્સાધુ દગ્ધ્વા વિકલ્પાન્
બ્રહ્માકૃત્યા નિવસતિ સુખં નિષ્ક્રિયો નિર્વિકલ્પઃ ॥ ૩૫૫॥

સમાહિતા યે પ્રવિલાપ્ય બાહ્યં
શ્રોત્રાદિ ચેતઃ સ્વમહં ચિદાત્મનિ ।
ત એવ મુક્તા ભવપાશબન્ધૈઃ
નાન્યે તુ પારોક્ષ્યકથાભિધાયિનઃ ॥ ૩૫૬॥

ઉપાધિભેદાત્સ્વયમેવ ભિદ્યતે var યોગાત્સ્વયમેવ
ચોપાધ્યપોહે સ્વયમેવ કેવલઃ ।
તસ્માદુપાધેર્વિલયાય વિદ્વાન્
વસેત્સદાऽકલ્પસમાધિનિષ્ઠયા ॥ ૩૫૭॥

સતિ સક્તો નરો યાતિ સદ્ભાવં હ્યેકનિષ્ઠયા ।
કીટકો ભ્રમરં ધ્યાયન્ ભ્રમરત્વાય કલ્પતે ॥ ૩૫૮॥

ક્રિયાન્તરાસક્તિમપાસ્ય કીટકો
ધ્યાયન્નલિત્વં હ્યલિભાવમૃચ્છતિ । ધ્યાયન્યથાલિં
તથૈવ યોગી પરમાત્મતત્ત્વં
ધ્યાત્વા સમાયાતિ તદેકનિષ્ઠયા ॥ ૩૫૯॥

અતીવ સૂક્ષ્મં પરમાત્મતત્ત્વં
   ન સ્થૂલદૃષ્ટ્યા પ્રતિપત્તુમર્હતિ ।
સમાધિનાત્યન્તસુસૂક્ષ્મવૃત્ત્યા
   જ્ઞાતવ્યમાર્યૈરતિશુદ્ધબુદ્ધિભિઃ ॥ ૩૬૦ ॥

યથા સુવર્ણં પુટપાકશોધિતં
   ત્યક્ત્વા મલં સ્વાત્મગુણં સમૃચ્છતિ ।
તથા મનઃ સત્ત્વરજસ્તમોમલં
   ધ્યાનેન સન્ત્યજ્ય સમેતિ તત્ત્વમ્ ॥ ૩૬૧ ॥

નિરન્તરાભ્યાસવશાત્તદિત્થં
   પક્વં મનો બ્રહ્મણિ લીયતે યદા ।
તદા સમાધિઃ સવિકલ્પવર્જિતઃ var સ વિકલ્પવર્જિતઃ
   સ્વતોઽદ્વયાનન્દરસાનુભાવકઃ ॥ ૩૬૨ ॥

સમાધિનાઽનેન સમસ્તવાસના-
   ગ્રન્થેર્વિનાશોઽખિલકર્મનાશઃ ।
અન્તર્બહિઃ સર્વત એવ સર્વદા
   સ્વરૂપવિસ્ફૂર્તિરયત્નતઃ સ્યાત્ ॥ ૩૬૩ ॥

શ્રુતેઃ શતગુણં વિદ્યાન્મનનં મનનાદપિ ।
નિદિધ્યાસં લક્ષગુણમનન્તં નિર્વિકલ્પકમ્ ॥ ૩૬૪ ॥

નિર્વિકલ્પકસમાધિના સ્ફુટં
   બ્રહ્મતત્ત્વમવગમ્યતે ધ્રુવમ્ ।
નાન્યથા ચલતયા મનોગતેઃ
   પ્રત્યયાન્તરવિમિશ્રિતં ભવેત્ ॥ ૩૬૫ ॥

અતઃ સમાધત્સ્વ યતેન્દ્રિયઃ સન્
   નિરન્તરં શાન્તમનાઃ પ્રતીચિ ।
વિધ્વંસય ધ્વાન્તમનાદ્યવિદ્યયા
   કૃતં સદેકત્વવિલોકનેન ॥ ૩૬૬ ॥

યોગસ્ય પ્રથમદ્વારં વાઙ્નિરોધોઽપરિગ્રહઃ । પ્રથમં દ્વારં
નિરાશા ચ નિરીહા ચ નિત્યમેકાન્તશીલતા ॥ ૩૬૭ ॥

એકાન્તસ્થિતિરિન્દ્રિયોપરમણે હેતુર્દમશ્ચેતસઃ

સંરોધે કરણં શમેન વિલયં યાયાદહંવાસના ।
તેનાનન્દરસાનુભૂતિરચલા બ્રાહ્મી સદા યોગિનઃ
તસ્માચ્ચિત્તનિરોધ એવ સતતં કાર્યઃ પ્રયત્નો મુનેઃ ॥ ૩૬૮॥ પ્રયત્નાન્મુનેઃ

વાચં નિયચ્છાત્મનિ તં નિયચ્છ
બુદ્ધૌ ધિયં યચ્છ ચ બુદ્ધિસાક્ષિણિ ।
તં ચાપિ પૂર્ણાત્મનિ નિર્વિકલ્પે
વિલાપ્ય શાન્તિં પરમાં ભજસ્વ ॥ ૩૬૯॥

દેહપ્રાણેન્દ્રિયમનોબુદ્ધ્યાદિભિરુપાધિભિઃ ।
યૈર્યૈર્વૃત્તેઃસમાયોગસ્તત્તદ્ભાવોઽસ્ય યોગિનઃ ॥ ૩૭૦॥

તન્નિવૃત્ત્યા મુનેઃ સમ્યક્ સર્વોપરમણં સુખમ્ ।
સન્દૃશ્યતે સદાનન્દરસાનુભવવિપ્લવઃ ॥ ૩૭૧॥

અન્તસ્ત્યાગો બહિસ્ત્યાગો વિરક્તસ્યૈવ યુજ્યતે ।
ત્યજત્યન્તર્બહિઃસઙ્ગં વિરક્તસ્તુ મુમુક્ષયા ॥ ૩૭૨॥

બહિસ્તુ વિષયૈઃ સઙ્ગં તથાન્તરહમાદિભિઃ । સઙ્ગઃ
વિરક્ત એવ શક્નોતિ ત્યક્તું બ્રહ્મણિ નિષ્ઠિતઃ ॥ ૩૭૩॥

વૈરાગ્યબોધૌ પુરુષસ્ય પક્ષિવત્
પક્ષૌ વિજાનીહિ વિચક્ષણ ત્વમ્ ।
વિમુક્તિસૌધાગ્રલતાધિરોહણં
તાભ્યાં વિના નાન્યતરેણ સિધ્યતિ ॥ ૩૭૪॥

અત્યન્તવૈરાગ્યવતઃ સમાધિઃ
સમાહિતસ્યૈવ દૃઢપ્રબોધઃ ।
પ્રબુદ્ધતત્ત્વસ્ય હિ બન્ધમુક્તિઃ
મુક્તાત્મનો નિત્યસુખાનુભૂતિઃ ॥ ૩૭૫॥

વૈરાગ્યાન્ન પરં સુખસ્ય જનકં પશ્યામિ વશ્યાત્મનઃ
તચ્ચેચ્છુદ્ધતરાત્મબોધસહિતં સ્વારાજ્યસામ્રાજ્યધુક્ ।
એતદ્દ્વારમજસ્રમુક્તિયુવતેર્યસ્માત્ત્વમસ્માત્પરં
સર્વત્રાસ્પૃહયા સદાત્મનિ સદા પ્રજ્ઞાં કુરુ શ્રેયસે ॥ ૩૭૬॥

આશાં છિન્દ્ધિ વિષોપમેષુ વિષયેષ્વેષૈવ મૃત્યોઃ કૃતિ- var મૃત્યોઃ સૃતિ
સ્ત્યક્ત્વા જાતિકુલાશ્રમેષ્વભિમતિં મુઞ્ચાતિદૂરાત્ક્રિયાઃ ।

દેહાદાવસતિ ત્યજાત્મધિષણાં પ્રજ્ઞાં કુરુષ્વાત્મનિ
ત્વં દ્રષ્ટાસ્યમનોઽસિ નિર્દ્વયપરં બ્રહ્માસિ યદ્વસ્તુતઃ ॥ ૩૭૭॥ દ્રષ્ટાસ્યમલો
લક્ષ્યે બ્રહ્મણિ માનસં દૃઢતરં સંસ્થાપ્ય બાહ્યેન્દ્રિયં
સ્વસ્થાને વિનિવેશ્ય નિશ્ચલતનુશ્ચોપેક્ષ્ય દેહસ્થિતિમ્ ।
બ્રહ્માત્મૈક્યમુપેત્ય તન્મયતયા ચાખણ્ડવૃત્ત્યાઽનિશં
બ્રહ્માનન્દરસં પિબાત્મનિ મુદા શૂન્યૈઃ કિમન્યૈર્ભૃશમ્ ॥ ૩૭૮॥ કિમન્યૈર્ભ્રમૈઃ
અનાત્મચિન્તનં ત્યક્ત્વા કશ્મલં દુઃખકારણમ્ ।
ચિન્તયાત્માનમાનન્દરૂપં યન્મુક્તિકારણમ્ ॥ ૩૭૯॥

એષ સ્વયઞ્જ્યોતિરશેષસાક્ષી
  વિજ્ઞાનકોશો વિલસત્યજસ્રમ્ । વિજ્ઞાનકોશે
લક્ષ્યં વિધાયૈનમસદ્વિલક્ષણ-
  મખણ્ડવૃત્ત્યાઽઽત્મતયાઽનુભાવય ॥ ૩૮૦॥

એતમચ્છિન્નયા વૃત્ત્યા પ્રત્યયાન્તરશૂન્યયા ।
ઉલ્લેખયન્વિજાનીયાત્સ્વસ્વરૂપતયા સ્ફુટમ્ ॥ ૩૮૧॥

અત્રાત્મત્વં દૃઢીકુર્વન્નહમાદિષુ સન્ત્યજન્ ।
ઉદાસીનતયા તેષુ તિષ્ઠેત્સ્ફુટઘટાદિવત્ ॥ ૩૮૨॥ તિષ્ઠેદ્ઘટપટાદિવત્
વિશુદ્ધમન્તઃકરણં સ્વરૂપે
  નિવેશ્ય સાક્ષિણ્યવબોધમાત્રે ।
શનૈઃ શનૈર્નિશ્ચલતામુપાનયન્
  પૂર્ણં સ્વમેવાનુવિલોકયેત્તતઃ ॥ ૩૮૩॥ પૂર્ણત્વમેવાનુ
દેહેન્દ્રિયપ્રાણમનોઽહમાદિભિઃ
  સ્વાજ્ઞાનક્લૃપ્તૈરખિલૈરુપાધિભિઃ ।
વિમુક્તમાત્માનમખણ્ડરૂપં
  પૂર્ણં મહાકાશમિવાવલોકયેત્ ॥ ૩૮૪॥

ઘટકલશકુસૂલસૂચિમુખ્યૈઃ
  ગગનમુપાધિશતૈર્વિમુક્તમેકમ્ ।
ભવતિ ન વિવિધં તથૈવ શુદ્ધં
  પરમહમાદિવિમુક્તમેકમેવ ॥ ૩૮૫॥

બ્રહ્માદિસ્તમ્બપર્યન્તા મૃષામાત્રા ઉપાધયઃ । બ્રહ્માદ્યાઃ સ્તમ્બ
તતઃ પૂર્ણં સ્વમાત્માનં પશ્યેદેકાત્મના સ્થિતમ્ ॥ ૩૮૬॥

યત્ર ભ્રાન્ત્યા કલ્પિતં તદ્વિવેકે  var  યદ્વિવેકે
   તત્તન્માત્રં નૈવ તસ્માદ્વિભિન્નમ્ ।
ભ્રાન્તેર્નાશે ભાતિ દૃષ્ટાહિતત્ત્વં  var  ભ્રાન્તિદૃષ્ટા
   રજ્જુસ્તદ્વદ્વિશ્વમાત્મસ્વરૂપમ્ ॥ ૩૮૭॥

સ્વયં બ્રહ્મા સ્વયં વિષ્ણુઃ સ્વયમિન્દ્રઃ સ્વયં શિવઃ ।
સ્વયં વિશ્વમિદં સર્વં સ્વસ્માદન્યન્ન કિઞ્ચન ॥ ૩૮૮॥

અન્તઃ સ્વયં ચાપિ બહિઃ સ્વયં ચ
   સ્વયં પુરસ્તાત્ સ્વયમેવ પશ્ચાત્ ।
સ્વયં હ્યાવાચ્યાં સ્વયમપ્યુદીચ્યાં  var  હ્યવાચ્યાં
   તથોપરિષ્ટાત્સ્વયમપ્યધસ્તાત્ ॥ ૩૮૯॥

તરઙ્ગફેનભ્રમબુદ્બુદાદિ
   સર્વં સ્વરૂપેણ જલં યથા તથા ।
ચિદેવ દેહાદ્યહમન્તમેતત્
   સર્વં ચિદેવૈકરસં વિશુદ્ધમ્ ॥ ૩૯૦॥

સદેવેદં સર્વં જગદવગતં વાઙ્મનસયોઃ
સતોઽન્યન્નાસ્ત્યેવ પ્રકૃતિપરસીમ્નિ સ્થિતવતઃ ।
પૃથક્ કિં મૃત્સ્નાયાઃ કલશઘટકુમ્ભાદ્યવગતં
વદત્યેષ ભ્રાન્તસ્ત્વમહમિતિ માયામદિરયા ॥ ૩૯૧॥

ક્રિયાસમભિહારેણ યત્ર નાન્યદિતિ શ્રુતિઃ ।
બ્રવીતિ દ્વૈતરાહિત્યં મિથ્યાધ્યાસનિવૃત્તયે ॥ ૩૯૨॥

આકાશવન્નિર્મલનિર્વિકલ્પં  var  નિર્વિકલ્પ
   નિઃસીમનિઃસ્પન્દનનિર્વિકારમ્ ।
અન્તર્બહિઃશૂન્યમનન્યમદ્વયં
   સ્વયં પરં બ્રહ્મ કિમસ્તિ બોધ્યમ્ ॥ ૩૯૩॥

વક્તવ્યં કિમુ વિદ્યતેઽત્ર બહુધા બ્રહ્મૈવ જીવઃ સ્વયં
બ્રહ્મૈતજ્જગદાતતં નુ સકલં બ્રહ્માદ્વિતીયં શ્રુતિઃ । જગદાપરાણુ સકલં
બ્રહ્મૈવાહમિતિ પ્રબુદ્ધમતયઃ સન્ત્યક્તબાહ્યાઃ સ્ફુટં
બ્રહ્મીભૂય વસન્તિ સન્તતચિદાનન્દાત્મનૈતદ્ધ્રુવમ્ ॥ ૩૯૪॥ આનન્દાત્મનૈવ ધ્રુવમ્
જહિ મલમયકોશેઽહન્ધિયોત્થાપિતાશાં
   પ્રસભમનિલકલ્પે લિઙ્ગદેહેઽપિ પશ્ચાત્ ।

નિગમગદિતકીર્તિં નિત્યમાનન્દમૂર્તિં
   સ્વયમિતિ પરિચીય બ્રહ્મરૂપેણ તિષ્ઠ ॥ ૩૯૫॥

શવાકારં યાવદ્ભજતિ મનુજસ્તાવદશુચિઃ
પરેભ્યઃ સ્યાત્ક્લેશો જનનમરણવ્યાધિનિલયઃ । વ્યાધિનિરયાઃ
યદાત્માનં શુદ્ધં કલયતિ શિવાકારમચલમ્
તદા તેભ્યો મુક્તો ભવતિ હિ તદાહ શ્રુતિરપિ ॥ ૩૯૬॥

સ્વાત્મન્યારોપિતાશેષાભાસવસ્તુનિરાસતઃ ।
સ્વયમેવ પરં બ્રહ્મ પૂર્ણમદ્વયમક્રિયમ્ ॥ ૩૯૭॥

સમાહિતાયાં સતિ ચિત્તવૃત્તૌ
   પરાત્મનિ બ્રહ્મણિ નિર્વિકલ્પે ।
ન દૃશ્યતે કશ્ચિદયં વિકલ્પઃ
   પ્રજલ્પમાત્રઃ પરિશિષ્યતે યતઃ ॥ ૩૯૮॥ તતઃ
અસત્કલ્પો વિકલ્પોઽયં વિશ્વમિત્યેકવસ્તુનિ ।
નિર્વિકારે નિરાકારે નિર્વિશેષે ભિદા કુતઃ ॥ ૩૯૯॥

દ્રષ્ટૃદર્શનદૃશ્યાદિભાવશૂન્યૈકવસ્તુનિ । દ્રષ્ટૃદર્શન
નિર્વિકારે નિરાકારે નિર્વિશેષે ભિદા કુતઃ ॥ ૪૦૦॥

કલ્પાર્ણવ ઇવાત્યન્તપરિપૂર્ણૈકવસ્તુનિ ।
નિર્વિકારે નિરાકારે નિર્વિશેષે ભિદા કુતઃ ॥ ૪૦૧॥

તેજસીવ તમો યત્ર પ્રલીનં ભ્રાન્તિકારણમ્ । યત્ર વિલીનં
અદ્વિતીયે પરે તત્ત્વે નિર્વિશેષે ભિદા કુતઃ ॥ ૪૦૨॥

એકાત્મકે પરે તત્ત્વે ભેદવાર્તા કથં વસેત્ । કથં ભવેત્
સુષુપ્તૌ સુખમાત્રાયાં ભેદઃ કેનાવલોકિતઃ ॥ ૪૦૩॥

ન હ્યસ્તિ વિશ્વં પરતત્ત્વબોધાત્
   સદાત્મનિ બ્રહ્મણિ નિર્વિકલ્પે ।
કાલત્રયે નાપ્યહિરીક્ષિતો ગુણે
   ન હ્યમ્બુબિન્દુર્મૃગતૃષ્ણિકાયામ્ ॥ ૪૦૪॥

માયામાત્રમિદં દ્વૈતમદ્વૈતં પરમાર્થતઃ ।
ઇતિ બ્રૂતે શ્રુતિઃ સાક્ષાત્સુષુપ્તાવનુભૂયતે ॥ ૪૦૫॥

અનન્યત્વમધિષ્ઠાનાદારોપ્યસ્ય નિરીક્ષિતમ્ ।

પણ્ડિતૈ રજ્જુસર્પાદૌ વિકલ્પો ભ્રાન્તિજીવનઃ ॥ ૪૦૬॥

ચિત્તમૂલો વિકલ્પોऽયં ચિત્તાભાવે ન કશ્ચન ।
અતશ્ચિત્તં સમાધેહિ પ્રત્યગ્રૂપે પરાત્મનિ ॥ ૪૦૭॥

કિમપિ સતતબોધં કેવલાનન્દરૂપં
  નિરુપમમતિવેલં નિત્યમુક્તં નિરીહમ્ ।
નિરવધિગગનાભં નિષ્કલં નિર્વિકલ્પં
  હૃદિ કલયતિ વિદ્વાન્ બ્રહ્મ પૂર્ણં સમાધૌ ॥ ૪૦૮॥

પ્રકૃતિવિકૃતિશૂન્યં ભાવનાતીતભાવં
  સમરસમસમાનં માનસમ્બન્ધદૂરમ્ ।
નિગમવચનસિદ્ધં નિત્યમસ્મત્પ્રસિદ્ધં
  હૃદિ કલયતિ વિદ્વાન્ બ્રહ્મ પૂર્ણં સમાધૌ ॥ ૪૦૯॥

અજરમમરમસ્તાભાવવસ્તુસ્વરૂપં var ભાસવસ્તુ
  સ્તિમિતસલિલરાશિપ્રખ્યમાખ્યાવિહીનમ્ ।
શમિતગુણવિકારં શાશ્વતં શાન્તમેકં
  હૃદિ કલયતિ વિદ્વાન્ બ્રહ્મ પૂર્ણં સમાધૌ ॥ ૪૧૦॥

સમાહિતાન્તઃકરણઃ સ્વરૂપે
  વિલોકયાત્માનમખણ્ડવૈભવમ્ ।
વિચ્છિન્દ્ધિ બન્ધં ભવગન્ધગન્ધિતં var ગન્ધગન્ધિલં
  યત્નેન પુંસ્ત્વં સફલીકુરુષ્વ ॥ ૪૧૧-
સર્વોપાધિવિનિર્મુક્તં સચ્ચિદાનન્દમદ્વયમ્ ।
ભાવયાત્માનમાત્મસ્થં ન ભૂયઃ કલ્પસેऽધ્વને ॥ ૪૧૨॥

છાયેવ પુંસઃ પરિદૃશ્યમાન-
  માભાસરૂપેણ ફલાનુભૂત્યા ।
શરીરમારાચ્છવવન્નિરસ્તં
  પુનર્ન સન્ધત્ત ઇદં મહાત્મા ॥ ૪૧૩॥

સતતવિમલબોધાનન્દરૂપં સમેત્ય var સ્વમેત્ય
  ત્યજ જડમલરૂપોપાધિમેતં સુદૂરે ।
અથ પુનરપિ નૈષ સ્મર્યતાં વાન્તવસ્તુ var પુનરપિ નૈવ
  સ્મરણવિષયભૂતં કલ્પતે કુત્સનાય ॥ ૪૧૪॥

સમૂલમેતત્પરિદાહ્ય વહ્નૌ var પરિદહ્ય
સદાત્મનિ બ્રહ્મણિ નિર્વિકલ્પે ।
તતઃ સ્વયં નિત્યવિશુદ્ધબોધા-
નન્દાત્મના તિષ્ઠતિ વિદ્વરિષ્ઠઃ ॥ ૪૧૫॥

પ્રારબ્ધસૂત્રગ્રથિતં શરીરં
પ્રયાતુ વા તિષ્ઠતુ ગોરિવ સ્રક્ ।
ન તત્પુનઃ પશ્યતિ તત્ત્વવેત્તા-
ऽऽનન્દાત્મનિ બ્રહ્મણિ લીનવૃત્તિઃ ॥ ૪૧૬॥

અખણ્ડાનન્દમાત્માનં વિજ્ઞાય સ્વસ્વરૂપતઃ ।
કિમિચ્છન્ કસ્ય વા હેતોર્દેહં પુષ્ણાતિ તત્ત્વવિત્ ॥ ૪૧૭॥

સંસિદ્ધસ્ય ફલં ત્વેતજ્જીવન્મુક્તસ્ય યોગિનઃ ।
બહિરન્તઃ સદાનન્દરસાસ્વાદનમાત્મનિ ॥ ૪૧૮॥

વૈરાગ્યસ્ય ફલં બોધો બોધસ્યોપરતિઃ ફલમ્ ।
સ્વાનન્દાનુભવાચ્છાન્તિરેષૈવોપરતેઃ ફલમ્ ॥ ૪૧૯॥

યદ્યુત્તરોત્તરાભાવઃ પૂર્વપૂર્વન્તુ નિષ્ફલમ્ ।
નિવૃત્તિઃ પરમા તૃપ્તિરાનન્દોऽનુપમઃ સ્વતઃ ॥ ૪૨૦॥

દૃષ્ટદુઃખેષ્વનુદ્વેગો વિદ્યાયાઃ પ્રસ્તુતં ફલમ્ ।
યત્કૃતં ભ્રાન્તિવેલાયાં નાના કર્મ જુગુપ્સિતમ્ ।
પશ્ચાન્નરો વિવેકેન તત્કથં કર્તુમર્હતિ ॥ ૪૨૧॥

વિદ્યાફલં સ્યાદસતો નિવૃત્તિઃ
પ્રવૃત્તિરજ્ઞાનફલં તદીક્ષિતમ્ ।
તજ્જ્ઞાજ્ઞયોર્યન્મૃગતૃષ્ણિકાદૌ
નોચેદ્વિદાં દૃષ્ટફલં કિમસ્માત્ ॥ ૪૨૨॥ નોચેદ્વિદો
અજ્ઞાનહૃદયગ્રન્થેર્વિનાશો યદ્યશેષતઃ ।
અનિચ્છોર્વિષયઃ કિં નુ પ્રવૃત્તેઃ કારણં સ્વતઃ ॥ ૪૨૩॥ વિદુષઃ કિં
વાસનાનુદયો ભોગ્યે વૈરાગ્યસ્ય તદાવધિઃ ।
અહમ્ભાવોદયાભાવો બોધસ્ય પરમાવધિઃ ।
લીનવૃત્તૈરનુત્પત્તિર્મર્યાદોપરતેસ્તુ સા ॥ ૪૨૪॥ વૃત્તેર
બ્રહ્માકારતયા સદા સ્થિતતયા નિર્મુક્તબાહ્યાર્થધી-
રન્યાવેદિતભોગ્યભોગકલનો નિદ્રાલુવદ્બાલવત્ ।

સ્વપ્નાલોકિતલોકવજ્જગદિદં પશ્યન્ક્વચિલ્લબ્ધધી-
રાસ્તે કશ્ચિદનન્તપુણ્યફલભુગ્ધન્યઃ સ માન્યો ભુવિ ॥ ૪૨૫॥

સ્થિતપ્રજ્ઞો યતિરયં યઃ સદાનન્દમશ્નુતે ।
બ્રહ્મણ્યેવ વિલીનાત્મા નિર્વિકારો વિનિષ્ક્રિયઃ ॥ ૪૨૬॥

બ્રહ્માત્મનોઃ શોધિતયોરેકભાવાવગાહિની ।
નિર્વિકલ્પા ચ ચિન્માત્રા વૃત્તિઃ પ્રજ્ઞેતિ કથ્યતે ।
સુસ્થિતાઽસૌ ભવેદ્યસ્ય સ્થિતપ્રજ્ઞઃ સ ઉચ્યતે ॥ ૪૨૭॥

યસ્ય સ્થિતા ભવેત્પ્રજ્ઞા યસ્યાનન્દો નિરન્તરઃ ।
પ્રપઞ્ચો વિસ્મૃતપ્રાયઃ સ જીવન્મુક્ત ઇષ્યતે ॥ ૪૨૮॥

લીનધીરપિ જાગર્તિ જાગ્રદ્ધર્મવિવર્જિતઃ ।
બોધો નિર્વાસનો યસ્ય સ જીવન્મુક્ત ઇષ્યતે ॥ ૪૨૯॥

શાન્તસંસારકલનઃ કલાવાનપિ નિષ્કલઃ ।
યસ્ય ચિત્તં વિનિશ્ચિન્તં સ જીવન્મુક્ત ઇષ્યતે ॥ ૪૩૦॥ યઃ સચિત્તોઽપિ નિશ્ચિત્તઃ
વર્તમાનેઽપિ દેહેઽસ્મિઞ્છાયાવદનુવર્તિનિ ।
અહન્તામમતાઽભાવો જીવન્મુક્તસ્ય લક્ષણમ્ ॥ ૪૩૧॥

અતીતાનનુસન્ધાનં ભવિષ્યદવિચારણમ્ ।
ઔદાસીન્યમપિ પ્રાપ્તં જીવન્મુક્તસ્ય લક્ષણમ્ ॥ ૪૩૨॥ પ્રાપ્તે
ગુણદોષવિશિષ્ટેઽસ્મિન્સ્વભાવેન વિલક્ષણે ।
સર્વત્ર સમદર્શિત્વં જીવન્મુક્તસ્ય લક્ષણમ્ ॥ ૪૩૩॥

ઇષ્ટાનિષ્ટાર્થસમ્પ્રાપ્તૌ સમદર્શિતયાઽઽત્મનિ ।
ઉભયત્રાવિકારિત્વં જીવન્મુક્તસ્ય લક્ષણમ્ ॥ ૪૩૪॥

બ્રહ્માનન્દરસાસ્વાદાસક્તચિત્તતયા યતેઃ ।
અન્તર્બહિરવિજ્ઞાનં જીવન્મુક્તસ્ય લક્ષણમ્ ॥ ૪૩૫॥

દેહેન્દ્રિયાદૌ કર્તવ્યે મમાહમ્ભાવવર્જિતઃ ।
ઔદાસીન્યેન યસ્તિષ્ઠેત્સ જીવન્મુક્તલક્ષણઃ ॥ ૪૩૬॥ સ જીવન્મુક્ત ઇષ્યતે
વિજ્ઞાત આત્મનો યસ્ય બ્રહ્મભાવઃ શ્રુતેર્બલાત્ ।
ભવબન્ધવિનિર્મુક્તઃ સ જીવન્મુક્તલક્ષણઃ ॥ ૪૩૭॥ સ જીવન્મુક્ત ઇષ્યતે
દેહેન્દ્રિયેષ્વહમ્ભાવ ઇદમ્ભાવસ્તદન્યકે ।
યસ્ય નો ભવતઃ ક્વાપિ સ જીવન્મુક્ત ઇષ્યતે ॥ ૪૩૮॥

જીવેશોભયસંસારરૂપદુર્વાસનોજ્ઝિતા ।
સા સર્વદા ભવેદ્યસ્ય સ જીવન્મુક્ત ઇષ્યતે ॥

ન પ્રત્યગ્બ્રહ્મણોર્ભેદં કદાપિ બ્રહ્મસર્ગયોઃ ।
પ્રજ્ઞયા યો વિજાનિતિ સ જીવન્મુક્તલક્ષણઃ ॥ ૪૩૯ ॥ સ જીવન્મુક્ત ઇષ્યતે
સાધુભિઃ પૂજ્યમાનેઽસ્મિન્પીડ્યમાનેઽપિ દુર્જનૈઃ ।
સમભાવો ભવેદ્યસ્ય સ જીવન્મુક્તલક્ષણઃ ॥ ૪૪૦ ॥ સ જીવન્મુક્ત ઇષ્યતે
યત્ર પ્રવિષ્ટા વિષયાઃ પરેરિતા
  નદીપ્રવાહા ઇવ વારિરાશૌ ।
લિનન્તિ સન્માત્રતયા ન વિક્રિયાં
  ઉત્પાદયન્ત્યેષ યતિર્વિમુક્તઃ ॥ ૪૪૧ ॥

વિજ્ઞાતબ્રહ્મતત્ત્વસ્ય યથાપૂર્વં ન સંસૃતિઃ ।
અસ્તિ ચેન્ન સ વિજ્ઞાતબ્રહ્મભાવો બહિર્મુખઃ ॥ ૪૪૨ ॥

પ્રાચીનવાસનાવેગાદસૌ સંસરતીતિ ચેત્ ।
ન સદેકત્વવિજ્ઞાનાન્મન્દી ભવતિ વાસના ॥ ૪૪૩ ॥

અત્યન્તકામુકસ્યાપિ વૃત્તિઃ કુણ્ઠતિ માતરિ ।
તથૈવ બ્રહ્મણિ જ્ઞાતે પૂર્ણાનન્દે મનીષિણઃ ॥ ૪૪૪ ॥

નિદિધ્યાસનશીલસ્ય બાહ્યપ્રત્યય ઈક્ષ્યતે ।
બ્રવીતિ શ્રુતિરેતસ્ય પ્રારબ્ધં ફલદર્શનાત્ ॥ ૪૪૫ ॥

સુખાદ્યનુભવો યાવત્તાવત્પ્રારબ્ધમિષ્યતે ।
ફલોદયઃ ક્રિયાપૂર્વો નિષ્ક્રિયો ન હિ કુત્રચિત્ ॥ ૪૪૬ ॥

અહં બ્રહ્મેતિ વિજ્ઞાનાત્કલ્પકોટિશતાર્જિતમ્ ।
સઞ્ચિતં વિલયં યાતિ પ્રબોધાત્સ્વપ્નકર્મવત્ ॥ ૪૪૭ ॥

યત્કૃતં સ્વપ્નવેલાયાં પુણ્યં વા પાપમુલ્બણમ્ ।
સુપ્તોત્થિતસ્ય કિન્તત્સ્યાત્સ્વર્ગાય નરકાય વા ॥ ૪૪૮ ॥

સ્વમસઙ્ગમુદાસીનં પરિજ્ઞાય નભો યથા ।
ન શ્લિષ્યતિ ચ યત્કિઞ્ચિત્કદાચિદ્ભાવિકર્મભિઃ ॥ ૪૪૯ ॥ શ્લિષ્યતે યતિઃ કિઞ્ચિત્
ન નભો ઘટયોગેન સુરાગન્ધેન લિપ્યતે ।
તથાત્મોપાધિયોગેન તદ્ધર્મૈર્નૈવ લિપ્યતે ॥ ૪૫૦ ॥

જ્ઞાનોદયાત્પુરારબ્ધં કર્મજ્ઞાનાન્ન નશ્યતિ ।

અદત્વા સ્વફલં લક્ષ્યમુદ્દિશ્યોત્સૃષ્ટબાણવત્ ॥ ૪૫૧॥

વ્યાઘ્રબુદ્ધ્યા વિનિર્મુક્તો બાણઃ પશ્ચાત્તુ ગોમતૌ ।
ન તિષ્ઠતિ છિનત્યેવ લક્ષ્યં વેગેન નિર્ભરમ્ ॥ ૪૫૨॥

પ્રારબ્ધં બલવત્તરં ખલુ વિદાં ભોગેન તસ્ય ક્ષયઃ
સમ્યગ્જ્ઞાનહુતાશનેન વિલયઃ પ્રાક્સઞ્ચિતાગામિનામ્ ।
બ્રહ્માત્મૈક્યમવેક્ષ્ય તન્મયતયા યે સર્વદા સંસ્થિતાઃ
તેષાં તત્ત્રિતયં નહિ ક્વચિદપિ બ્રહ્મૈવ તે નિર્ગુણમ્ ॥ ૪૫૩॥

ઉપાધિતાદાત્મ્યવિહીનકેવલ-
    બ્રહ્માત્મનૈવાત્મનિ તિષ્ઠતો મુનેઃ ।
પ્રારબ્ધસદ્ભાવકથા ન યુક્તા
    સ્વપ્નાર્થસમ્બન્ધકથેવ જાગ્રતઃ ॥ ૪૫૪॥

ન હિ પ્રબુદ્ધઃ પ્રતિભાસદેહે
    દેહોપયોગિન્યપિ ચ પ્રપઞ્ચે ।
કરોત્યહન્તાં મમતામિદન્તાં
    કિન્તુ સ્વયં તિષ્ઠતિ જાગરેણ ॥ ૪૫૫॥

ન તસ્ય મિથ્યાર્થસમર્થનેચ્છા
    ન સઙ્ગ્રહસ્તજ્જગતોऽપિ દૃષ્ટઃ ।
તત્રાનુવૃત્તિર્યદિ ચેન્મૃષાર્થે
    ન નિદ્રયા મુક્ત ઇતીષ્યતે ધ્રુવમ્ ॥ ૪૫૬॥

તદ્વત્પરે બ્રહ્મણિ વર્તમાનઃ
    સદાત્મના તિષ્ઠતિ નાન્યદીક્ષતે ।
સ્મૃતિર્યથા સ્વપ્નવિલોકિતાર્થે
    તથા વિદઃ પ્રાશનમોચનાદૌ ॥ ૪૫૭॥

કર્મણા નિર્મિતો દેહઃ પ્રારબ્ધં તસ્ય કલ્પ્યતામ્ ।
નાનાદેરાત્મનો યુક્તં નૈવાત્મા કર્મનિર્મિતઃ ॥ ૪૫૮॥

અજો નિત્યઃ શાશ્વત ઇતિ બ્રૂતે શ્રુતિરમોઘવાક્ । અજો નિત્ય ઇતિ બ્રૂતે શ્રુતિરેષા ત્વમોઘવાક્
તદાત્મના તિષ્ઠતોऽસ્ય કુતઃ પ્રારબ્ધકલ્પના ॥ ૪૫૯॥

પ્રારબ્ધં સિધ્યતિ તદા યદા દેહાત્મના સ્થિતિઃ ।
દેહાત્મભાવો નૈવેષ્ટઃ પ્રારબ્ધં ત્યજ્યતામતઃ ॥ ૪૬૦॥

શરીરસ્યાપિ પ્રારબ્ધકલ્પના ભ્રાન્તિરેવ હિ ।
અધ્યસ્તસ્ય કુતઃ સત્ત્વમસત્યસ્ય કુતો જનિઃ । સત્ત્વમસત્ત્વસ્ય
અજાતસ્ય કુતો નાશઃ પ્રારબ્ધમસતઃ કુતઃ ॥ ૪૬૧॥

જ્ઞાનેનાજ્ઞાનકાર્યસ્ય સમૂલસ્ય લયો યદિ ।
તિષ્ઠત્યયં કથં દેહ ઇતિ શઙ્કાવતો જડાન્ ॥ ૪૬૨॥

સમાધાતું બાહ્યદૃષ્ટ્યા પ્રારબ્ધં વદતિ શ્રુતિઃ ।
ન તુ દેહાદિસત્યત્વબોધનાય વિપશ્ચિતામ્ ।
યતઃ શ્રુતેરભિપ્રાયઃ પરમાર્થૈકગોચરઃ ॥ ૪૬૩॥ extra

પરિપૂર્ણમનાદ્યન્તમપ્રમેયમવિક્રિયમ્ ।
એકમેવાદ્વયં બ્રહ્મ નેહ નાનાસ્તિ કિઞ્ચન ॥ ૪૬૪॥

સદ્ઘનં ચિદ્ઘનં નિત્યમાનન્દઘનમક્રિયમ્ ।
એકમેવાદ્વયં બ્રહ્મ નેહ નાનાસ્તિ કિઞ્ચન ॥ ૪૬૫॥

પ્રત્યગેકરસં પૂર્ણમનન્તં સર્વતોમુખમ્ ।
એકમેવાદ્વયં બ્રહ્મ નેહ નાનાસ્તિ કિઞ્ચન ॥ ૪૬૬॥

અહેયમનુપાદેયમનાદેયમનાશ્રયમ્ । મનાધેયમના
એકમેવાદ્વયં બ્રહ્મ નેહ નાનાસ્તિ કિઞ્ચન ॥ ૪૬૭॥

નિર્ગુણં નિષ્કલં સૂક્ષ્મં નિર્વિકલ્પં નિરઞ્જનમ્ ।
એકમેવાદ્વયં બ્રહ્મ નેહ નાનાસ્તિ કિઞ્ચન ॥ ૪૬૮॥

અનિરૂપ્ય સ્વરૂપં યન્મનોવાચામગોચરમ્ ।
એકમેવાદ્વયં બ્રહ્મ નેહ નાનાસ્તિ કિઞ્ચન ॥ ૪૬૯॥

સત્સમૃદ્ધં સ્વતઃસિદ્ધં શુદ્ધં બુદ્ધમનીદૃશમ્ ।
એકમેવાદ્વયં બ્રહ્મ નેહ નાનાસ્તિ કિઞ્ચન ॥ ૪૭૦॥

નિરસ્તરાગા વિનિરસ્તભોગાઃ var નિરપાસ્તભોગાઃ
   શાન્તાઃ સુદાન્તા યતયો મહાન્તઃ ।
વિજ્ઞાય તત્ત્વં પરમેતદન્તે
   પ્રાપ્તાઃ પરાં નિર્વૃતિમાત્મયોગાત્ ॥ ૪૭૧॥

ભવાનપીદં પરતત્ત્વમાત્મનઃ
   સ્વરૂપમાનન્દઘનં વિચાર્ય । નિચાય્ય

વિધૂય મોહં સ્વમનઃપ્રકલ્પિતં
   મુક્તઃ કૃતાર્થો ભવતુ પ્રબુદ્ધઃ ॥ ૪૭૨॥

સમાધિના સાધુવિનિશ્ચલાત્મના  var  સુનિશ્ચલાત્મના
   પશ્યાત્મતત્ત્વં સ્ફુટબોધચક્ષુષા ।
નિઃસંશયં સમ્યગવેક્ષિતશ્ચે-
   ચ્છ્રુતઃ પદાર્થો ન પુનર્વિકલ્પ્યતે ॥ ૪૭૩॥ પુનર્વિકલ્પતે
સ્વસ્યાવિદ્યાબન્ધસમ્બન્ધમોક્ષા-
   ત્સત્યજ્ઞાનાનન્દરૂપાત્મલબ્ધૌ ।
શાસ્ત્રં યુક્તિર્દેશિકોક્તિઃ પ્રમાણં
   ચાન્તઃસિદ્ધા સ્વાનુભૂતિઃ પ્રમાણમ્ ॥ ૪૭૪॥

બન્ધો મોક્ષશ્ચ તૃપ્તિશ્ચ ચિન્તાऽऽરોગ્યક્ષુધાદયઃ ।
સ્વેનૈવ વેદ્યા યજ્જ્ઞાનં પરેષામાનુમાનિકમ્ ॥ ૪૭૫॥

તટસ્થિતા બોધયન્તિ ગુરવઃ શ્રુતયો યથા ।
પ્રજ્ઞયૈવ તરેદ્વિદ્વાનીશ્વરાનુગૃહીતયા ॥ ૪૭૬॥

સ્વાનુભૂત્યા સ્વયં જ્ઞાત્વા સ્વમાત્માનમખણ્ડિતમ્ ।
સંસિદ્ધઃ સમ્મુખં તિષ્ઠેન્નિર્વિકલ્પાત્મનાऽऽત્મનિ ॥ ૪૭૭॥ સુસુખં તિષ્ઠેન્
વેદાન્તસિદ્ધાન્તનિરુક્તિરેષા
   બ્રહ્મૈવ જીવઃ સકલં જગચ્ચ ।
અખણ્ડરૂપસ્થિતિરેવ મોક્ષો
   બ્રહ્માદ્વિતીયે શ્રુતયઃ પ્રમાણમ્ ॥ ૪૭૮॥ બ્રહ્માદ્વિતીયં
ઇતિ ગુરુવચનાચ્છ્રુતિપ્રમાણાત્
   પરમવગમ્ય સતત્ત્વમાત્મયુક્ત્યા ।
પ્રશમિતકરણઃ સમાહિતાત્મા
   ક્વચિદચલાકૃતિરાત્મનિષ્ઠતોऽભૂત્ ॥ ૪૭૯॥ આત્મનિષ્ઠિતો
કિઞ્ચિત્કાલં સમાધાય પરે બ્રહ્મણિ માનસમ્ । કઞ્ચિત્કાલં
ઉત્થાય પરમાનન્દાદિદં વચનમબ્રવીત્ ॥ ૪૮૦॥ વ્યુત્થાય
બુદ્ધિર્વિનષ્ટા ગલિતા પ્રવૃત્તિઃ
   બ્રહ્માત્મનોરેકતયાऽધિગત્યા ।
ઇદં ન જાનેऽપ્યનિદં ન જાને
   કિં વા કિયદ્વા સુખમસ્ત્યપારમ્ ॥ ૪૮૧॥ સુખમસ્ય પારમ્

વાચા વક્તુમશક્યમેવ મનસા મન્તું ન વા શક્યતે
સ્વાનન્દામૃતપૂરપૂરિતપરબ્રહ્મામ્બુધેર્વૈભવમ્ ।
અમ્ભોરાશિવિશીર્ણવાર્ષિકશિલાભાવં ભજન્મે મનો
યસ્યાંશાંશલવે વિલીનમધુનાઽઽનન્દાત્મના નિર્વૃતમ્ ॥ ૪૮૨॥

ક્વ ગતં કેન વા નીતં કુત્ર લીનમિદં જગત્ ।
અધુનૈવ મયા દૃષ્ટં નાસ્તિ કિં મહદદ્ભુતમ્ ॥ ૪૮૩॥

કિં હેયં કિમુપાદેયં કિમન્યત્કિં વિલક્ષણમ્ ।
અખણ્ડાનન્દપીયૂષપૂર્ણે બ્રહ્મમહાર્ણવે ॥ ૪૮૪॥

ન કિઞ્ચિદત્ર પશ્યામિ ન શ‍ૃણોમિ ન વેદ્મ્યહમ્ ।
સ્વાત્મનૈવ સદાનન્દરૂપેણાસ્મિ વિલક્ષણઃ ॥ ૪૮૫॥

નમો નમસ્તે ગુરવે મહાત્મને
  વિમુક્તસઙ્ગાય સદુત્તમાય ।
નિત્યાદ્વયાનન્દરસસ્વરૂપિણે
  ભૂમ્ને સદાઽપારદયામ્બુધામ્ને ॥ ૪૮૬॥

યત્કટાક્ષશશિસાન્દ્રચન્દ્રિકા-
  પાતધૂતભવતાપજશ્રમઃ ।
પ્રાપ્તવાનહમખણ્ડવૈભવા-
  નન્દમાત્મપદમક્ષયં ક્ષણાત્ ॥ ૪૮૭॥

ધન્યોઽહં કૃતકૃત્યોઽહં વિમુક્તોઽહં ભવગ્રહાત્ ।
નિત્યાનન્દસ્વરૂપોઽહં પૂર્ણોઽહં ત્વદનુગ્રહાત્ ॥ ૪૮૮॥

અસઙ્ગોઽહમનઙ્ગોઽહમલિઙ્ગોઽહમભઙ્ગુરઃ ।
પ્રશાન્તોઽહમનન્તોઽહમમલોઽહં ચિરન્તનઃ ॥ ૪૮૯॥ ઽહમતાન્તોઽહં
અકર્તાહમભોક્તાહમવિકારોઽહમક્રિયઃ ।
શુદ્ધબોધસ્વરૂપોઽહં કેવલોઽહં સદાશિવઃ ॥ ૪૯૦॥

દ્રષ્ટુઃ શ્રોતુર્વક્તુઃ કર્તુર્ભોક્તુર્વિભિન્ન એવાહમ્ ।
નિત્યનિરન્તરનિષ્ક્રિયનિઃસીમાસઙ્ગપૂર્ણબોધાત્મા ॥ ૪૯૧॥

નાહમિદં નાહમદોઽપ્યુભયોરવભાસકં પરં શુદ્ધમ્ ।
બાહ્યાભ્યન્તરશૂન્યં પૂર્ણં બ્રહ્માદ્વિતીયમેવાહમ્ ॥ ૪૯૨॥

નિરુપમમનાદિતત્ત્વં ત્વમહમિદમદ ઇતિ કલ્પનાદૂરમ્ ।

નિત્યાનન્દૈકરસં સત્યં બ્રહ્માદ્વિતીયમેવાહમ્ ॥ ૪૯૩॥

નારાયણોઽહં નરકાન્તકોઽહં
  પુરાન્તકોઽહં પુરુષોઽહમીશઃ ।
અખણ્ડબોધોઽહમશેષસાક્ષી
  નિરીશ્વરોઽહં નિરહં ચ નિર્મમઃ ॥ ૪૯૪॥

સર્વેષુ ભૂતેષ્વહમેવ સંસ્થિતો
  જ્ઞાનાત્મનાઽન્તર્બહિરાશ્રયઃ સન્ ।
ભોક્તા ચ ભોગ્યં સ્વયમેવ સર્વં
  યદ્યત્પૃથગ્દૃષ્ટમિદન્તયા પુરા ॥ ૪૯૫॥

મય્યખણ્ડસુખામ્ભોધૌ બહુધા વિશ્વવીચયઃ ।
ઉત્પદ્યન્તે વિલીયન્તે માયામારુતવિભ્રમાત્ ॥ ૪૯૬॥

સ્થુલાદિભાવા મયિ કલ્પિતા ભ્રમા-
  દારોપિતાનુસ્ફુરણેન લોકૈઃ ।
કાલે યથા કલ્પકવત્સરાય-
  ણર્ત્વાદયો નિષ્કલનિર્વિકલ્પે ॥ ૪૯૭॥

આરોપિતં નાશ્રયદૂષકં ભવેત્
  કદાપિ મૂઢૈરતિદોષદૂષિતૈઃ । મૂઢૈર્મતિ
નાર્દ્રીકરોત્યૂષરભૂમિભાગં
  મરીચિકાવારિ મહાપ્રવાહઃ ॥ ૪૯૮॥

આકાશવલ્લેપવિદૂરગોઽહં var આકાશવત્ કલ્પવિ
  આદિત્યવદ્ભાસ્યવિલક્ષણોઽહમ્ ।
અહાર્યવન્નિત્યવિનિશ્ચલોઽહં
  અમ્ભોધિવત્પારવિવર્જિતોઽહમ્ ॥ ૪૯૯॥

ન મે દેહેન સમ્બન્ધો મેઘેનેવ વિહાયસઃ ।
અતઃ કુતો મે તદ્ધર્મા જાગ્રત્સ્વપ્નસુષુપ્તયઃ ॥ ૫૦૦॥

ઉપાધિરાયાતિ સ એવ ગચ્છતિ
  સ એવ કર્માણિ કરોતિ ભુઙ્ક્તે ।
સ એવ જીર્યન્ મ્રિયતે સદાહં var એવ જીવન્
  કુલાદ્રિવન્નિશ્ચલ એવ સંસ્થિતઃ ॥ ૫૦૧॥

ન મે પ્રવૃત્તિર્ન ચ મે નિવૃત્તિઃ
   સદૈકરૂપસ્ય નિરંશકસ્ય ।
એકાત્મકો યો નિવિડો નિરન્તરો var નિબિડો
   વ્યોમેવ પૂર્ણઃ સ કથં નુ ચેષ્ટતે ॥ ૫૦૨॥

પુણ્યાનિ પાપાનિ નિરિન્દ્રિયસ્ય
   નિશ્ચેતસો નિર્વિકૃતેર્નિરાકૃતેઃ ।
કુતો મમાખણ્ડસુખાનુભૂતેઃ
   બ્રૂતે હ્યનન્વાગતમિત્યપિ શ્રુતિઃ ॥ ૫૦૩॥

છાયયા સ્પૃષ્ટમુષ્ણં વા શીતં વા સુષ્ઠુ દુઃષ્ઠુ વા ।
ન સ્પૃશત્યેવ યત્કિઞ્ચિત્પુરુષં તદ્વિલક્ષણમ્ ॥ ૫૦૪॥

ન સાક્ષિણં સાક્ષ્યધર્માઃ સંસ્પૃશન્તિ વિલક્ષણમ્ ।
અવિકારમુદાસીનં ગૃહધર્માઃ પ્રદીપવત્ ।
દેહેન્દ્રિયમનોધર્મા નૈવાત્માનં સ્પૃશન્ત્યહો ॥ ૫૦૫॥ extra

રવેર્યથા કર્મણિ સાક્ષિભાવો
   વહ્નેર્યથા દાહનિયામકત્વમ્ । વાઽયસિ દાહકત્વમ્
રજ્જોર્યથાઽઽરોપિતવસ્તુસઙ્ગઃ
   તથૈવ કૂટસ્થચિદાત્મનો મે ॥ ૫૦૬॥

કર્તાપિ વા કારયિતાપિ નાહં
   ભોક્તાપિ વા ભોજયિતાપિ નાહમ્ ।
દ્રષ્ટાપિ વા દર્શયિતાપિ નાહં
   સોઽહં સ્વયઞ્જ્યોતિરનીદૃગાત્મા ॥ ૫૦૭॥

ચલત્યુપાધૌ પ્રતિબિમ્બલૌલ્ય-
   મૌપાધિકં મૂઢધિયો નયન્તિ ।
સ્વબિમ્બભૂતં રવિવદ્વિનિષ્ક્રિયં
   કર્તાસ્મિ ભોક્તાસ્મિ હતોઽસ્મિ હેતિ ॥ ૫૦૮॥

જલે વાપિ સ્થલે વાપિ લુઠત્વેષ જડાત્મકઃ ।
નાહં વિલિપ્યે તદ્ધર્મૈર્ઘટધર્મૈર્નભો યથા ॥ ૫૦૯॥

કર્તૃત્વભોક્તૃત્વખલત્વમત્તતા-
   જડત્વબદ્ધત્વવિમુક્તતાદયઃ ।

બુદ્ધેર્વિકલ્પા ન તુ સન્તિ વસ્તુતઃ
  સ્વસ્મિન્પરે બ્રહ્મણિ કેવલેઽદ્વયે ॥ ૫૧૦॥

સન્તુ વિકારાઃ પ્રકૃતેર્દશધા શતધા સહસ્રધા વાપિ ।
કિં મેઽસઙ્ગચિતસ્તૈર્ન ઘનઃ ક્વચિદમ્બરં સ્પૃશતિ ॥ ૫૧૧॥ તૈઃ કિં મેઽસઙ્ગચિતેર્ન હ્યમ્બુદઽમ્બરોઽમ્બરં
અવ્યક્તાદિસ્થૂલપર્યન્તમેતત્
  વિશ્વં યત્રાભાસમાત્રં પ્રતીતમ્ ।
વ્યોમપ્રખ્યં સૂક્ષ્મમાદ્યન્તહીનં
  બ્રહ્માદ્વૈતં યત્તદેવાહમસ્મિ ॥ ૫૧૨॥

સર્વાધારં સર્વવસ્તુપ્રકાશં
  સર્વાકારં સર્વગં સર્વશૂન્યમ્ ।
નિત્યં શુદ્ધં નિશ્ચલં નિર્વિકલ્પં var નિષ્કલં
  બ્રહ્માદ્વૈતં યત્તદેવાહમસ્મિ ॥ ૫૧૩॥

યત્પ્રત્યસ્તાશેષમાયાવિશેષં
  પ્રત્યગ્રૂપં પ્રત્યયાગમ્યમાનમ્ ।
સત્યજ્ઞાનાનન્તમાનન્દરૂપં
  બ્રહ્માદ્વૈતં યત્તદેવાહમસ્મિ ॥ ૫૧૪॥

નિષ્ક્રિયોઽસ્મ્યવિકારોઽસ્મિ
  નિષ્કલોઽસ્મિ નિરાકૃતિઃ ।
નિર્વિકલ્પોઽસ્મિ નિત્યોઽસ્મિ
  નિરાલમ્બોઽસ્મિ નિર્દ્વયઃ ॥ ૫૧૫॥

સર્વાત્મકોઽહં સર્વોઽહં સર્વાતીતોઽહમદ્વયઃ ।
કેવલાખણ્ડબોધોઽહમાનન્દોઽહં નિરન્તરઃ ॥ ૫૧૬॥

સ્વારાજ્યસામ્રાજ્યવિભૂતિરેષા
  ભવત્કૃપાશ્રીમહિમપ્રસાદાત્ ।
પ્રાપ્તા મયા શ્રીગુરવે મહાત્મને
  નમો નમસ્તેઽસ્તુ પુનર્નમોઽસ્તુ ॥ ૫૧૭॥

મહાસ્વપ્ને માયાકૃતજનિજરામૃત્યુગહને
ભ્રમન્તં ક્લિશ્યન્તં બહુલતરતાપૈરનુદિનમ્ । રનુકલમ્
અહઙ્કારવ્યાઘ્રવ્યથિતમિમમત્યન્તકૃપયા
પ્રબોધ્ય પ્રસ્વાપાત્પરમવિતવાન્મામસિ ગુરો ॥ ૫૧૮॥

નમસ્તસ્મૈ સદૈકસ્મૈ કસ્મૈચિન્મહસે નમઃ । સદેકસ્મૈ નમશ્ચિન્મહસે મુહુઃ
યદેતદ્વિશ્વરૂપેણ રાજતે ગુરુરાજ તે ॥ ૫૧૯॥

ઇતિ નતમવલોક્ય શિષ્યવર્યં
  સમધિગતાત્મસુખં પ્રબુદ્ધતત્ત્વમ્ ।
પ્રમુદિતહૃદયં સ દેશિકેન્દ્રઃ var હૃદયઃ
  પુનરિદમાહ વચઃ પરં મહાત્મા ॥ ૫૨૦॥

બ્રહ્મપ્રત્યયસન્તતિર્જગદતો બ્રહ્મૈવ તત્સર્વતઃ var સત્સર્વતઃ
પશ્યાધ્યાત્મદૃશા પ્રશાન્તમનસા સર્વાસ્વવસ્થાસ્વપિ ।
રૂપાદન્યદવેક્ષિતં કિમભિતશ્ચક્ષુષ્મતાં દૃશ્યતે var વિદ્યતે
તદ્વદ્બ્રહ્મવિદઃ સતઃ કિમપરં બુદ્ધેર્વિહારાસ્પદમ્ ॥ ૫૨૧॥

કસ્તાં પરાનન્દરસાનુભૂતિ-
  મૃત્સૃજ્ય શૂન્યેષુ રમેત વિદ્વાન્ । મુત્સૃજ્ય
ચન્દ્રે મહાહ્લાદિનિ દીપ્યમાને
  ચિત્રેન્દુમાલોકયિતું ક ઇચ્છેત્ ॥ ૫૨૨॥

અસત્પદાર્થાનુભવેન કિઞ્ચિન્
  ન હ્યસ્તિ તૃપ્તિર્ન ચ દુઃખહાનિઃ ।
તદદ્વયાનન્દરસાનુભૂત્યા
  તૃપ્તઃ સુખં તિષ્ઠ સદાત્મનિષ્ઠયા ॥ ૫૨૩॥

સ્વમેવ સર્વથા પશ્યન્મન્યમાનઃ સ્વમદ્વયમ્ । સર્વતઃ
સ્વાનન્દમનુભુઞ્જાનઃ કાલં નય મહામતે ॥ ૫૨૪॥

અખણ્ડબોધાત્મનિ નિર્વિકલ્પે
  વિકલ્પનં વ્યોમ્નિ પુરપ્રકલ્પનમ્ ।
તદદ્વયાનન્દમયાત્મના સદા
  શાન્તિં પરામેત્ય ભજસ્વ મૌનમ્ ॥ ૫૨૫॥

તૂષ્ણીમવસ્થા પરમોપશાન્તિઃ
  બુદ્ધેરસત્કલ્પવિકલ્પહેતોઃ ।
બ્રહ્માત્મનો બ્રહ્મવિદો મહાત્મનો
  યત્રાદ્વયાનન્દસુખં નિરન્તરમ્ ॥ ૫૨૬॥

નાસ્તિ નિર્વાસનાન્મૌનાત્પરં સુખકૃદુત્તમમ્ ।
વિજ્ઞાતાત્મસ્વરૂપસ્ય સ્વાનન્દરસપાયિનઃ ॥ ૫૨૭॥

ગચ્છંસ્તિષ્ઠન્નુપવિશઞ્છયાનો વાઽન્યથાપિ વા ।
યથેચ્છયા વસેદ્વિદ્વાનાત્મારામઃ સદા મુનિઃ ॥ ૫૨૮॥

ન દેશકાલાસનદિગ્યમાદિ-
 લક્ષ્યાદ્યપેક્ષાઽપ્રતિબદ્ધવૃત્તેઃ । પ્રતિબદ્ધ
સંસિદ્ધતત્ત્વસ્ય મહાત્મનોઽસ્તિ
 સ્વવેદને કા નિયમાદ્યવસ્થા ॥ ૫૨૯॥

ઘટોઽયમિતિ વિજ્ઞાતું નિયમઃ કોઽન્વવેક્ષતે । અપેક્ષ્યતે
વિના પ્રમાણસુષ્ઠુત્વં યસ્મિન્સતિ પદાર્થધીઃ ॥ ૫૩૦॥

અયમાત્મા નિત્યસિદ્ધઃ પ્રમાણે સતિ ભાસતે ।
ન દેશં નાપિ વા કાલં ન શુદ્ધિં વાપ્યપેક્ષતે ॥ ૫૩૧॥

દેવદત્તોઽહમિત્યેતદ્વિજ્ઞાનં નિરપેક્ષકમ્ ।
તદ્વદ્બ્રહ્મવિદોઽપ્યસ્ય બ્રહ્માહમિતિ વેદનમ્ ॥ ૫૩૨॥

ભાનુનેવ જગત્સર્વં ભાસતે યસ્ય તેજસા ।
અનાત્મકમસત્તુચ્છં કિં નુ તસ્યાવભાસકમ્ ॥ ૫૩૩॥

વેદશાસ્ત્રપુરાણાનિ ભૂતાનિ સકલાન્યપિ ।
યેનાર્થવન્તિ તં કિન્નુ વિજ્ઞાતારં પ્રકાશયેત્ ॥ ૫૩૪॥

એષ સ્વયઞ્જ્યોતિરનન્તશક્તિઃ
 આત્માઽપ્રમેયઃ સકલાનુભૂતિઃ ।
યમેવ વિજ્ઞાય વિમુક્તબન્ધો
 જયત્યયં બ્રહ્મવિદુત્તમોત્તમઃ ॥ ૫૩૫॥

ન ખિદ્યતે નો વિષયૈઃ પ્રમોદતે
 ન સજ્જતે નાપિ વિરજ્યતે ચ ।
સ્વસ્મિન્સદા ક્રીડતિ નન્દતિ સ્વયં
 નિરન્તરાનન્દરસેન તૃપ્તઃ ॥ ૫૩૬॥

ક્ષુધાં દેહવ્યથાં ત્યક્ત્વા બાલઃ ક્રીડતિ વસ્તુનિઃ । વસ્તુનિ
તથૈવ વિદ્વાન્ રમતે નિર્મમો નિરહં સુખી ॥ ૫૩૭॥

ચિન્તાશૂન્યમદૈન્યભૈક્ષમશનં પાનં સરિદ્વારિષુ
સ્વાતન્ત્ર્યેણ નિરઙ્કુશા સ્થિતિરભીર્નિદ્રા શ્મશાને વને ।
વસ્ત્રં ક્ષાલનશોષણાદિરહિતં દિગ્વાસ્તુ શય્યા મહી
સઞ્ચારો નિગમાન્તવીથિષુ વિદાં ક્રીડા પરે બ્રહ્મણિ ॥ ૫૩૮॥

વિમાનમાલમ્બ્ય શરીરમેતદ્
ભુનક્ત્યશેષાન્વિષયાનુપસ્થિતાન્ ।
પરેચ્છયા બાલવદાત્મવેત્તા
યોઽવ્યક્તલિઙ્ગોઽનનુષક્તબાહ્યઃ ॥ ૫૩૯॥

દિગમ્બરો વાપિ ચ સામ્બરો વા
ત્વગમ્બરો વાપિ ચિદમ્બરસ્થઃ ।
ઉન્મત્તવદ્વાપિ ચ બાલવદ્વા
પિશાચવદ્વાપિ ચરત્યવન્યામ્ ॥ ૫૪૦॥

કામાન્નિષ્કામરૂપી સંશ્ચરત્યેકચરો મુનિઃ । કામાન્ની કામરૂપી
સ્વાત્મનૈવ સદા તુષ્ટઃ સ્વયં સર્વાત્મના સ્થિતઃ ॥ ૫૪૧॥

ક્વચિન્મૂઢો વિદ્વાન્ ક્વચિદપિ મહારાજવિભવઃ
ક્વચિદ્ભ્રાન્તઃ સૌમ્યઃ ક્વચિદજગરાચારકલિતઃ ।
ક્વચિત્પાત્રીભૂતઃ ક્વચિદવમતઃ ક્વાપ્યવિદિતઃ
ચરત્યેવં પ્રાજ્ઞઃ સતતપરમાનન્દસુખિતઃ ॥ ૫૪૨॥

નિર્ધનોઽપિ સદા તુષ્ટોઽપ્યસહાયો મહાબલઃ ।
નિત્યતૃપ્તોઽપ્યભુઞ્જાનોઽપ્યસમઃ સમદર્શનઃ ॥ ૫૪૩॥

અપિ કુર્વન્નકુર્વાણશ્ચાભોક્તા ફલભોગ્યપિ ।
શરીર્યપ્યશરીર્યેષ પરિચ્છિન્નોઽપિ સર્વગઃ ॥ ૫૪૪॥

અશરીરં સદા સન્તમિમં બ્રહ્મવિદં ક્વચિત્ ।
પ્રિયાપ્રિયે ન સ્પૃશતસ્તથૈવ ચ શુભાશુભે ॥ ૫૪૫॥

સ્થૂલાદિસમ્બન્ધવતોઽભિમાનિનઃ
સુખં ચ દુઃખં ચ શુભાશુભે ચ ।
વિધ્વસ્તબન્ધસ્ય સદાત્મનો મુનેઃ
કુતઃ શુભં વાઽપ્યશુભં ફલં વા ॥ ૫૪૬॥

તમસા ગ્રસ્તવદ્ભાનાદગ્રસ્તોઽપિ રવિર્જનૈઃ ।

ગ્રસ્ત ઇત્યુચ્યતે ભ્રાન્ત્યાં હ્યજ્ઞાત્વા વસ્તુલક્ષણમ્ ॥ ૫૪૭॥ ભ્રાન્ત્યા
તદ્વદ્દેહાદિબન્ધેભ્યો વિમુક્તં બ્રહ્મવિત્તમમ્ ।
પશ્યન્તિ દેહિવન્મૂઢાઃ શરીરાભાસદર્શનાત્ ॥ ૫૪૮॥

અહિર્નિર્લ્વયનીં વાયં મુક્ત્વા દેહં તુ તિષ્ઠતિ । અહિનિ
ઇતસ્તતશ્ચાલ્યમાનો યત્કિઞ્ચિત્પ્રાણવાયુના ॥ ૫૪૯॥

સ્રોતસા નીયતે દારુ યથા નિમ્નોન્નતસ્થલમ્ ।
દૈવેન નીયતે દેહો યથાકાલોપભુક્તિષુ ॥ ૫૫૦॥

પ્રારબ્ધકર્મપરિકલ્પિતવાસનાભિઃ
   સંસારિવચ્ચરતિ ભુક્તિષુ મુક્તદેહઃ ।
સિદ્ધઃ સ્વયં વસતિ સાક્ષિવદત્ર તૂષ્ણીં
   ચક્રસ્ય મૂલમિવ કલ્પવિકલ્પશૂન્યઃ ॥ ૫૫૧॥

નૈવેન્દ્રિયાણિ વિષયેષુ નિયુઙ્ક્ત એષ
   નૈવાપયુઙ્ક્ત ઉપદર્શનલક્ષણસ્થઃ ।
નૈવ ક્રિયાફલમપીષદવેક્ષતે સ var અપીષદપેક્ષતે સઃ
   સ્વાનન્દસાન્દ્રરસપાનસુમત્તચિત્તઃ ॥ ૫૫૨॥

લક્ષ્યાલક્ષ્યગતિં ત્યક્ત્વા યસ્તિષ્ઠેત્કેવલાત્મના ।
શિવ એવ સ્વયં સાક્ષાદયં બ્રહ્મવિદુત્તમઃ ॥ ૫૫૩॥

જીવન્નેવ સદા મુક્તઃ કૃતાર્થો બ્રહ્મવિત્તમઃ ।
ઉપાધિનાશાદ્બ્રહ્મૈવ સન્ બ્રહ્માપ્યેતિ નિર્દ્વયમ્ ॥ ૫૫૪॥

શૈલૂષો વેષસદ્ભાવાભાવયોશ્ચ યથા પુમાન્ ।
તથૈવ બ્રહ્મવિચ્છ્રેષ્ઠઃ સદા બ્રહ્મૈવ નાપરઃ ॥ ૫૫૫॥

યત્ર ક્વાપિ વિશીર્ણં સત્પર્ણમિવ તરોર્વપુઃ પતતાત્ । વિશીર્ણં પર્ણમિવ
બ્રહ્મીભૂતસ્ય યતેઃ પ્રાગેવ તચ્ચિદગ્નિના દગ્ધમ્ ॥ ૫૫૬॥

સદાત્મનિ બ્રહ્મણિ તિષ્ઠતો મુનેઃ
   પૂર્ણાऽદ્વયાનન્દમયાત્મના સદા ।
ન દેશકાલાદ્યુચિતપ્રતીક્ષા
   ત્વઙ્માંસવિટ્પિણ્ડવિસર્જનાય ॥ ૫૫૭॥

દેહસ્ય મોક્ષો નો મોક્ષો ન દણ્ડસ્ય કમણ્ડલોઃ ।
અવિદ્યાહૃદયગ્રન્થિમોક્ષો મોક્ષો યતસ્તતઃ ॥ ૫૫૮॥

કુલ્યાયામથ નદ્યાં વા શિવક્ષેત્રેઽપિ ચત્વરે ।
પર્ણં પતતિ ચેત્તેન તરોઃ કિં નુ શુભાશુભમ્ ॥ ૫૫૯॥

પત્રસ્ય પુષ્પસ્ય ફલસ્ય નાશવદ્-
 દેહેન્દ્રિયપ્રાણધિયાં વિનાશઃ ।
નૈવાત્મનઃ સ્વસ્ય સદાત્મકસ્યા-
 નન્દાકૃતેર્વૃક્ષવદસ્તિ ચૈષઃ ॥ ૫૬૦॥ વદાસ્ત એષઃ
પ્રજ્ઞાનઘન ઇત્યાત્મલક્ષણં સત્યસૂચકમ્ ।
અનૂદ્યૌપાધિકસ્યૈવ કથયન્તિ વિનાશનમ્ ॥ ૫૬૧॥

અવિનાશી વા અરેઽયમાત્મેતિ શ્રુતિરાત્મનઃ ।
પ્રબ્રવીત્યવિનાશિત્વં વિનશ્યત્સુ વિકારિષુ ॥ ૫૬૨॥

પાષાણવૃક્ષતૃણધાન્યકડઙ્ગરાદ્યા var કટામ્બરાદ્યા
 દગ્ધા ભવન્તિ હિ મૃદેવ યથા તથૈવ ।
દેહેન્દ્રિયાસુમન આદિ સમસ્તદૃશ્યં
 જ્ઞાનાગ્નિદગ્ધમુપયાતિ પરાત્મભાવમ્ ॥ ૫૬૩॥

વિલક્ષણં યથા ધ્વાન્તં લીયતે ભાનુતેજસિ ।
તથૈવ સકલં દૃશ્યં બ્રહ્મણિ પ્રવિલીયતે ॥ ૫૬૪॥

ઘટે નષ્ટે યથા વ્યોમ વ્યોમૈવ ભવતિ સ્ફુટમ્ ।
તથૈવોપાધિવિલયે બ્રહ્મૈવ બ્રહ્મવિત્સ્વયમ્ ॥ ૫૬૫॥

ક્ષીરં ક્ષીરે યથા ક્ષિપ્તં તૈલં તૈલે જલં જલે ।
સંયુક્તમેકતાં યાતિ તથાઽઽત્મન્યાત્મવિન્મુનિઃ ॥ ૫૬૬॥

એવં વિદેહકૈવલ્યં સન્માત્રત્વમખણ્ડિતમ્ ।
બ્રહ્મભાવં પ્રપદ્યૈષ યતિર્નાવર્તતે પુનઃ ॥ ૫૬૭॥

સદાત્મૈકત્વવિજ્ઞાનદગ્ધાવિદ્યાદિવર્ષ્મણઃ ।
અમુષ્ય બ્રહ્મભૂતત્વાદ્ બ્રહ્મણઃ કુત ઉદ્ભવઃ ॥ ૫૬૮॥

માયાક્લૃપ્તૌ બન્ધમોક્ષૌ ન સ્તઃ સ્વાત્મનિ વસ્તુતઃ ।
યથા રજ્જૌ નિષ્ક્રિયાયાં સર્પાભાસવિનિર્ગમૌ ॥ ૫૬૯॥

આવૃતેઃ સદસત્ત્વાભ્યાં વક્તવ્યે બન્ધમોક્ષણે ।
નાવૃતિર્બ્રહ્મણઃ કાચિદન્યાભાવાદનાવૃતમ્ ।

યદ્યસ્ત્યદ્વૈતહાનિઃ સ્યાદ્ દ્વૈતં નો સહતે શ્રુતિઃ ॥ ૫૭૦॥

બન્ધશ્ચ મોક્ષશ્ચ મૃષૈવ મૂઢા
   બુદ્ધેર્ગુણં વસ્તુનિ કલ્પયન્તિ ।
દૃગાવૃતિં મેઘકૃતાં યથા રવૌ
   યતોઽદ્વયાઽસઙ્ગચિદેતદક્ષરમ્ ॥ ૫૭૧॥ ચિદેકમક્ષરમ્
અસ્તીતિ પ્રત્યયો યશ્ચ યશ્ચ નાસ્તીતિ વસ્તુનિ ।
બુદ્ધેરેવ ગુણાવેતૌ ન તુ નિત્યસ્ય વસ્તુનઃ ॥ ૫૭૨॥

અતસ્તૌ માયયા ક્લૃપ્તૌ બન્ધમોક્ષૌ ન ચાત્મનિ ।
નિષ્કલે નિષ્ક્રિયે શાન્તે નિરવદ્યે નિરઞ્જને ।
અદ્વિતીયે પરે તત્ત્વે વ્યોમવત્કલ્પના કુતઃ ॥ ૫૭૩॥

ન નિરોધો ન ચોત્પત્તિર્ન બદ્ધો ન ચ સાધકઃ ।
ન મુમુક્ષુર્ન વૈ મુક્ત ઇત્યેષા પરમાર્થતા ॥ ૫૭૪॥

સકલનિગમચૂડાસ્વાન્તસિદ્ધાન્તરૂપં
   પરમિદમતિગુહ્યં દર્શિતં તે મયાદ્ય ।
અપગતકલિદોષં કામનિર્મુક્તબુદ્ધિં var બુદ્ધિઃ
   સ્વસુતવદસકૃત્ત્વાં ભાવયિત્વા મુમુક્ષુમ્ ॥ ૫૭૫॥

ઇતિ શ્રુત્વા ગુરોર્વાક્યં પ્રશ્રયેણ કૃતાનતિઃ ।
સ તેન સમનુજ્ઞાતો યયૌ નિર્મુક્તબન્ધનઃ ॥ ૫૭૬॥

ગુરુરેવ સદાનન્દસિન્ધૌ નિર્મગ્નમાનસઃ । ગુરુરેષ
પાવયન્વસુધાં સર્વાં વિચચાર નિરન્તરઃ ॥ ૫૭૭॥

ઇત્યાચાર્યસ્ય શિષ્યસ્ય સંવાદેનાત્મલક્ષણમ્ ।
નિરૂપિતં મુમુક્ષૂણાં સુખબોધોપપત્તયે ॥ ૫૭૮॥

હિતમિદમુપદેશમાદ્રિયન્તાં
   વિહિતનિરસ્તસમસ્તચિત્તદોષાઃ ।
ભવસુખવિરતાઃ પ્રશાન્તચિત્તાઃ var સુખવિમુખાઃ
   શ્રુતિરસિકા યતયો મુમુક્ષવો યે ॥ ૫૭૯॥

સંસારાધ્વનિ તાપભાનુકિરણપ્રોદ્ભૂતદાહવ્યથા-
ખિન્નાનાં જલકાઙ્ક્ષયા મરુભુવિ ભ્રાન્ત્યા પરિભ્રામ્યતામ્ ।
અત્યાસન્નસુધામ્બુધિં સુખકરં બ્રહ્માદ્વયં દર્શય-

ત્યેષા શઙ્કરભારતી વિજયતે નિર્વાણસન્દાયિની ॥ ૫૮૦॥

॥ ઇતિ શઙ્કરાચાર્યવિરચિતં વિવેકચૂડામણિઃ ॥

॥ ૐ તત્સત્ ॥

Encoded NA
Proofread by NA, Kalyana Krrit kalyanakrrit at gmail.com,
PSA Easwaran

Main text is as per Vivekashudamani, Advaita Ashram , Calcutta.
(translated by Swami Madhavananda),

Some variations on the right of verse lines are added from vyAkhyA by
Sringeri Jagadguru ShriChandrasekhara Bharati Mahaswami, published
by Abhinava Vidyatirtha Educational Trust, Sringeri, Karnataka.

*vivekachUDAmaNiH*
pdf was typeset on December 3, 2021

Please send corrections to *sanskrit@cheerful.com*